Shree Raghunath Sanskrit Research Institute Library,
Jammu

No. २०२ - घ

Title सिद्धान्त कौमुदी व्याख्या

Author नागेशभट्टः

Extent १८ Age

Subject व्याकरणम्

© Dharmartha Trust J&K. Digitized by eGangotri

नं: २०२ - घ

(सिद्धान्त कौमुदी व्याख्या) स्वरवैदिकीकौमुदी

लघुशब्देन्दुशेखरस्वर स्वरप्रक्रिया (अपूर्ण)

पत्राणि १८ (व्याकरणम्)

कर्त्ता : नागेश भट्ट:

© Dharmartha Trust J&K. Digitized by eGangotri

निद्यारत्नमारत्नं
अग्रत्न पुण्यपरमप्राचीनपधन्यात्ममानयोगरत्नवरेत्नवैन्पचरि
नैपुण्य न
बाहुल्य

सतांसंतापहारिरूपःस्वरूपःसंतुपातिनेऽ
कलानिधेरिवकलाःसकलानंदहेतवः॥२॥
अमंदगिरिजानंदानिदानमघवारणं। हेरंबम
वलंबेऽहमयलंबमनीषिणं।

स्वपश्रीमहत्स्वपस्वपजलधेर्हौर्यूपस्वपस्वातेवास्त्ता
श्रीमत्स्वपकराः

२५५

[redacted]

स्वरकौमुदीसत्त

© Dharmartha Trust J&K. Digitized by eGangotri

स्व०रा०शो० श्रीगणेशाय नमः॥ श्रीसिद्धेश्वर्यै नमः॥ ॥ उच्चैरुदात्तः। ताल्वादिषु सभागेषु स्थानेषूर्ध्वभागेऽच्चारितोऽच् उदात्तसंज्ञः स्यात्। देवः। नीचैरनुदात्तः॥
१ नीचैस्स्थाने उच्चारितोऽच् अनुदात्तसंज्ञः स्यात्। देव। समाहारः स्वरितः॥ उदात्तत्वानुदात्तत्वयोर्मेलनं समाहारस्तद्वानच् स्वरितसंज्ञः स्यात्॥
तस्यादित उदात्तमर्धह्रस्वं। तस्य स्वरितस्यादितोऽर्धमात्रोदात्ता बोध्या। परिशेषात्परिशिष्टमनुदात्तं। क्व॑। वोऽश्वाः। नयेऽराः। ते रुद्रौ। अत्र चतुर्थीश
। उदात्तः। केचित्तु स्वग्रहणमतंत्रं स्वरितस्यार्धमुदात्तं बोध्यमित्याहुः। तेषां मतेऽर्धमुदात्तमर्धमनुदात्तं। उदात्तस्वरितपरस्येदं। तदपरत्वे तु परिशिष्ट
स्यानुदात्तस्योदात्तश्रुतिरुक्ता प्रातिशाख्ये। अग्निमीळे। अनुदात्तं पदमेकवर्जं। परिभाषेयं स्वरविषया। यस्मिन्पदे यस्योदात्तः स्वरितो वा विधीयते
तमेकं वर्जयित्वा शेषं तत्पदं अनुदात्ताच्कं स्यात्। देवा। अनुदात्तस्य च यत्रोदात्तलोपः। यस्मिन्ननुदात्ते परे उदात्तो लुप्यते तस्योदात्तः स्यात्। देवी॥
पचादिषु देवट् इति पाठाट्टित्वात् ङीप्यनुदात्तेऽयस्येति चेत्यकारलोपः। नन्वनुदात्तस्येति किमर्थं। नह्युदात्ते स्वरिते वा परे उदात्तलोपोऽस्ति। पूर्वोक्तप
रिभाषया अनुदात्तविधानादुदात्तयोरुदात्तस्वरितयोर्वैकस्मिन्पदेऽसत्त्वादिति चेत्। सत्यं। माऽऽङ्धुक्षाताम्। इत्यत्र दुहेर्लुङि आताम्। शलइगुपधे
तर्द् ति क्सः क्सस्याचीत्यंतलोपे कृते आताम्। अनेनास्त्यनुदात्तोऽसांतोदात्तत्वं माभूत्। आद्युदात्तत्वं यथा स्यादित्येतदर्थमनुदात्तग्रहणं। अत्राविद्यमानो
दात्तोऽनुदात्तशब्देन विवक्षितः। तेन क्सादद्युपदेशात् सरस्याताम् ओ लसार्वधातुकानुदात्तत्वं बाधित्वा परत्वात्क्सलोपे प्रत्ययस्वरसिद्धिः। आतामः
प्रत्ययस्वरोऽपि न प्रवर्त्तते। अनुदात्तस्यापवादविषयस्य सत्वात्। तदपि क्सलोपेन परत्वाद्बाध्यते इति वस्तुस्थितिः। उदात्तस्वरितयोर्यणः स्व
रितोऽनुदात्तस्य। उदात्तस्थाने स्वरितस्य च स्थाने यो यण्, ततः परस्यानुदात्तस्य स्वरितः स्यात्। अभ्यभिहि। खलप्वी। खलपूशब्दः कृत्स्वरेणां
तोदात्तस्ततः परो ङिः प्रत्ययः सुप्त्वादनुदात्तः। तस्य स्वरितः। स्वरितयणः। खलप्व्याऽऽशा। आ आशा शब्द आशाया आदिगा रव्या वेदित्यंतोदात्तः। राम
ननु यणादेशं स्वरितस्यासिद्धत्वात्स्वरितयणः परस्यानुदात्तस्य कथं स्वरितत्वं। न च [illegible] स्वरितयणः परस्येत्यास्यया सिद्धत्वं शक्यं। उदात्ता १

© Dharmartha Trust J&K. Digitized by eGangotri

नुदात्तस्येति विहितस्यापि स्वरितस्य यणि सिद्धत्वं स्यात्। तथा च। प्रति अग्निः प्रत्यग्निरित्यादौ स्वरितयण इति स्वरितत्वं स्यादिति चेत्। न। उदात्त
यणः परस्यानुदात्तस्थानिकस्य स्वरितस्य यणि कर्त्तव्ये सिद्धत्वं वाच्यमिति वचनान्नोक्तदोषः। यद्वा। योगविभागः क्रियते। उदात्तयणः परस्या
नुदात्तस्य स्वरितत्वं। ततः स्वरितस्य उदात्तयणः इत्यनेन विहितस्य स्वरितस्य स्थाने यो यण् ततः परस्यानुदात्तस्य स्वरितत्वं। तेनैवाश्रयासि
द्धत्वं न विप्रतिपत्तिनान्यस्य। यद्वा। स्वरितग्रहणं न क्रियते। उदात्तयण एवकारात्परस्याकारस्य स्वरितः। स्वरविधौ व्यंजनमविद्यमानवदिति परि
भाषया यकारेण व्यवधायकः। न च पूर्वस्माद्विधौ स्थानिवद्भावादिकारो व्यवधायकः स्यादिति वाच्यं। पूर्वत्रासिद्धे न स्थानिवदिति निषेधात्।
स्वरे कर्त्तव्ये लोपाजादेशमेव न स्थानिवदिति नियमो हि स्वरविधौ नेति प्रतिपदोक्तस्यैव निषेधस्य न तु पूर्वत्रासिद्धीयस्य अप्रयुक्तस्यापि। अत
एव संति अग्ने सं त्वमग्ने इत्यादौ सशब्दाकारमाश्रित्योदात्तादनुदात्तस्येति स्वरितत्वं भवति। एकादेश उदात्तेनोदात्तः। उदात्तेन सह एकादेश
उदात्तः स्यात्। वृत्र उ वृत्रो। वृ अश्वः। वोश्वाः। केशावं स्तित्वा स्वरित। अवरः स्वांगशिरामदंतानामित्याद्युदात्तः। तयोर्दीर्घः क्वावेरं मरुव
इत्युदात्तः। वृत्रौ तु उदात्तेन सहानुदात्तस्यैकादेश उदात्त इत्युक्तं तत्र क्वावरं न सिध्येत्। अंतर्यतः स्वरितत्वे प्राप्ते यमारं गः। अयमेका
देशस्वरोंतरंगः सिद्धो वाच्यः। वृत्रयि देवृत्रा वत्री। प्रयू आ वृएतौ उदात्तौ यथासमातां। अन्यान्यपि प्रयोजनानि भाष्ये द्रष्टव्यानि। स्वरितो
वानुदात्ते पदादौ। अनुदात्ते पदादौ परे उदात्तेन सहैकादेशः स्वरितो वा स्यात्। पक्षे पूर्वेणोदात्तः। वीरुदं ज्योतिः। अस्य श्लोको दिवीयते
अत्रैवं व्यवस्थां कुर्वंति। ह्रस्वेकारयोरेकादेशः स्वरितः दीर्घप्रवेशे तूदात्तः। किंचेङः परं तादृतीत्येकादेशः स्वरित एव। तेवदन्। सोऽयमा
गात्। उदात्तादनुदात्तस्य स्वरितः। उदात्तात्परस्यानुदात्तस्य संहितायां स्वरितः स्यात्। अग्निमीळे। स्वरविधौ व्यंजनमविद्यमानवदिति प
रिभाषया मकारेण व्यवधायकः। एवं सर्वत्र ज्ञेयं। नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवानां। उदात्तपरः स्वरितपरश्चानुदात्तः स्वरि

© Dharmartha Trust J&K. Digitized by eGangotri

स्व·रा·शो· तो न स्यात्। गार्ग्यादिमते तु स्यादेव। प्रथ्य श्रा रुः। स्वघ्नः छे। अनंतरस्येति न्यायेन पूर्वस्यैवायं निषेधो न तूदात्तस्वरितयोरित्यस्य। तेन खलु घ्यो
१ गां। नि अग्निं न्य पुष्टिं। पाहि अस्मान् न्यारुपस्मान्। इत्यादौ स्वरितत्वं भवत्येव। स्वरितात् संहितायामनुदात्तानां। स्वरितात्परेषामनुदात्तानां
संहितायामेकश्रुतिः स्यात्। इमं मे गंगे यमुने। आमंत्रितानुदात्तयोरेकश्रुतिः। अत्रानुदात्तानामिति बहुत्वस्याविवक्षणाद् अग्निमीळे इमं मे
2 गंगे इत्यादावप्येकश्रुतिर्भवति। उदात्तस्वरितपरस्य सन्नतरः। उदात्तपरस्य स्वरितपरस्यैकश्रुतिः स्वरस्यानुदात्ततरः स्यात्। इमं मे गंगे
यमुने सरस्वति शुतुद्रि। व्येवन्द्रयस्त्वं। यत्तु इत्यादिग्रंथे घनुदात्तस्यानुदात्ततरः स्यादिति सूत्रं व्याख्यातं। अग्निं वृन्यो इत्यादौ सन्नतरः स्वीकृ
हरादिति १ तस्तत्सर्वं एकश्रुतिसूत्रे स्थभाष्यकैय्यटाभ्यां विरोधादुपेक्ष्यं। किंच तस्यादित उदात्तमित्यादिनैव सूत्रे स्वरस्थानादुच्च्योक्षशास्त्रांते कर्तव्ये ति भा
ष्यादिसिद्धांतात् सूत्रेऽसिद्धमित्यसिद्धत्वात् गंगे अनू तीनामिव सरस्वतीकारस्यापि पूर्वेणैकश्रुतिः प्राप्नोति। अस्याग्निं वृन्येत्यादिरवकाशस्तेना
पवादमपि नास्ति। अत्र यदुक्तं हरदत्तादिभिः। नमुने इत्यत्र नेति योगविभागादेकश्रुतिं प्रति सन्नतरस्यासिद्धत्वमिति। तन्न। एतदर्थस्य यो
गविभागस्य भाष्यादावकरणात्। किंचास्मिन्पक्षे एकश्रुतेरिव स्वरितस्यापि परत्वाद्बाधकः स्यादिति नोदात्तस्वरितोदयमिति सूत्रं व्यर्थं स्यात्।
तस्माद्यथोक्तमेव साधीयः॥ इति साधारणाः स्वराः॥ ॥वाक्यार्थेषु तिङंतवाच्यक्रियायाः प्राधान्यात् प्रथमं तिङंतस्वरा उच्यंते॥ अतः॥ अतो
रंतमुदात्तः स्यात्। ऊर्णोति। व्यपदेशिवद्भावादेकाच्चेत् भवति। पचति। येनुदात्ता उपदेशे उच्चारितास्तेष्वप्ययं विधिः प्रवर्तते। अनुदात्तोपदे
शस्येट् निषेधविधौ चरितार्थत्वात्। अत्ति। वसति। पाघ्राध्मादिसूत्रे पिबादेशस्याद्युदात्तनिपातनसामर्थ्यात्तत्रायं विधिर्न प्रवर्तते। गुपादि
भ्योंतोदात्तेभ्यश्चायादयः प्रत्ययाः। आद्युदात्तश्च। प्रत्ययश्चाद्युदात्तः स्यात्। तत्र सर्वेषामेवोदात्तत्वे प्राप्ते। सति शिष्टस्वरबलीयस्त्वमन्यत्र राम
विकरणेभ्य इति वाच्यं। अत्र रूवां ऊर्ध्वशास्तु न्यायसिद्धः। यदा यदा योयउदात्तविधिः प्रवर्तते तदा तदा तेन तेन सहानुदात्तं पदमिति भाष्ये कैय्य २
इत्यायादीनामाद्युदात्तत्वे कृते तदंतस्य धातुसंज्ञायां पुनर्धातोरंतोदात्तत्वं प्रवर्तते॥२ परि १

© Dharmartha Trust J&K. Digitized by eGangotri

कृतत्वात्प्रवर्त्तते। तथा च यदागमप्रत्ययाद्युदात्तत्वं तदा छन्दशब्दावनुदात्तौ। ततो धातुसंज्ञायां यः शब्दुदात्तः पाश्चात्योप्यनुदात्तः। एवं सर्वत्र ज्ञेयं। न चात्रा
द्यपिपदसंज्ञाया अभावात्तत्र च पदग्रहणानर्थक्यमिदानीमेव परिभाषाप्रवृत्तेरिति चेन्न। यावतावधेः पदत्वं भविष्यति तावल्लघ एवावधेरनुदात्त
त्वं यथा स्यात्तत्वाधिकस्येत्येतदर्थं पदग्रहणमिति भाष्यादिसिद्धांतात्। एतच्च पदस्य ग्रहणेनुवर्त्तमाने पुनः पदग्रहणाल्लभ्यते। अन्यत्र विकरणे
भ्य इत्यस्यायमर्थः। सतिशिष्टोपि विकरणस्वरः सार्वधातुकस्वरं न बाधत इति। धातुस्वरं तु बाधत एव। गुपादिभ्यः सनि कृते प्रत्ययाद्युदात्त
त्वे धातुस्वरे च प्राप्ते। ञ्नित्यादिर्नित्यं। ञिदंतस्य निदंतस्य वादिरुदात्तः स्यात्प्रत्ययस्वरापवादः। ननु जुगुप्सेत्यादौ धातुसंज्ञां बाधित्वा परत्वान्नित्
स्वरे कृते सन्नंतस्य धातुसंज्ञायां सतिशिष्टत्वाद्धातुस्वरः प्राप्नोतीति चेन्मैवं। एवं हि सति सनो नित्त्वं व्यर्थं स्यात्। न च सन्युङोरिति विशेषणार्थं
नित्त्वं सयङोरित्युक्ते वृत्तवदिह निकमिकषिभ्यः सः बुसः हंसः इत्यादावपि द्वित्वं स्यादिति वाच्यं। उणादीनामव्युत्पन्नत्वात्। यद्वा धातोरित्यनुव
र्त्ये धातोः सशब्दांतस्य द्वित्वं विधीयमानं वस्स इत्यादौ न भवतीति। तस्मान्नित्स्वरादाद्युदात्तत्वं स्थितं। ननु जुगुप्स इति स्थिते द्वित्वं परत्वात्
निस्वरो बाधेत। ततो द्वित्वे एकस्मिन्पदे द्वयोरुदात्तयोरभावात्कदाचिदभ्यास उदात्तः कदाचिद्द्वितीय उदात्तः स्यान्नित्यमाद्युदात्तत्वमिष्यते।
इति। अत्र कश्चित्सनि पिति कृते धातुस्वरे स्थिते द्वित्वे कृते कदाचिदाद्युदात्ते कदाचिन्मध्योदात्ते सिद्धे नित्यमाद्युदात्तार्थमेवेत्याह। तन्न। सपि
सति जाग्रप्रभृतिभ्यः सपि कृते धातोरंतोदात्तत्वे स्थिते जागृशब्दस्य द्वित्वे कृते अनुदात्तादिपरं स्यात्। सनि तु सति अप्यमद्वितौ ययोः पर्या
येणोदात्तत्वं भविष्यति। तस्मादत्र सिद्धांतो वाच्य इति चेत्। उच्यते। अंतरंगत्वात्पूर्वं द्वित्वे कृते निस्वरः प्रवर्त्तते इति न कोपि दोषः। अत एवाद्य
दृश्यते। अत्रांतोदात्तत्वमेव न तु कदाचिन्मध्योदात्तत्वं। यो नो दिवादिप्सतीत्यत्र परत्वादभ्यासलोपे च कृते आद्युदात्तत्वं तस्मात्सन्नंता आद्युदात्ता

अनोर्थ्यः एव। इतरेपि बभिन्ना अंतोदात्ता इति स्थितं। धातोर्लट् लिङ् लोट् लङ् ष्य सन्नेषु तेषां तिबादय आदेशाः। तेषु परेषु शप्। अनुदात्तौ सुप्पितौ।
सुप्पितौ एतौ अनुदात्तौ स्तः। प्रत्ययस्वरापवादः। इति शबनुदात्तः। तिप्सिप्मिप एतानुदात्ताः। पचति। तसादीनां प्रत्ययत्वादाद्युदात्तत्वे प्राप्ते॥

द्वित्वे

© Dharmartha Trust J&K. Digitized by eGangotri

ख०श०शे० तास्यनुदात्तेन्ङिददुपदेशाल्लसार्वधातुकमनुदात्तम ह्नुङिङोः। तासेरनुदात्तेतः ङिदुपदेशाददकारांतोपदेशाच्च परं लसार्वधातुकमनुदात्तं स्यात्
3 ह्नुङिङोर्वर्जयित्वा। पचतः। अनुबंधनामनेकांतत्वाद्वकारांतोपदेश एकांतत्वपक्षेपि उदीचां माङ इति कृतात्वनिर्देशात् कार्येष्वनुबंधनाम
प्रतिबंधकत्वमनुमीयते। ननु पचृ इति स्थिते परत्वात् शप्। यन्नादिष्टपदेशि इत्यनं स्वरसिध्यर्थ इति वचनादंतरंगत्वाज्ज्ञातादेशे कृते शप्
पि कृते पच अ ति स्थिते अदुपदेशात्परस्यां तेरनुदात्तत्वं बाधित्वा वर्णमात्राश्रितत्वेनांतरंगत्वाद् अतो गुणे इत्येकादेशः प्राप्नोति। तस्मिन्कृते
व्यपवर्गाभावादयं स्वरो न प्राप्नोति। न चांतादिवद्भावेनाव्यपवर्गः। उभयत आश्रये तन्निषेधात्। न च स्थानेऽन्तरवगतिर्युज्यते। पचत इत्यादौ
वचनस्य सावकाशत्वात्। यत्तु अत्र स्वरमंजरीकारः एकदेशि इति तं अदुपदेशात्परस्य लसार्वधातुकावयवस्थाने योयमेकादेशस्तस्य
स्वरः न चैवं सति पूर्वोक्तदोषापत्तिरिति। तन्न। एवमपि अदुपदेशस्य लसार्वधातुकस्यैकादेशे कृते भेदाभावात्कथं पूर्वोक्तदोषो न स्यात्। किंच
पचत इत्यत्रैकादेशाभावादव्याप्तिः स्यात्। किंच सार्वधातुकस्यैकादेश इति कस्य शब्दस्यार्थः। न सामर्थ्यलभ्यः। न वानुवृत्तिरस्ति। तस्माद्देशस्या कादे ७
दिवद्भावात्प्रत्यया द्युदात्तत्वेन मध्योदात्तं पचंतीति प्राप्नोति। तस्मादत्र गतिर्वक्तव्येति चेद् उच्यते। स्थानिवद्भावादेव गतिः। तथाहि। परेति स
न्निमित्तः शप एकादेशः सोऽनादिष्टादचोंतेरकारात्स्वेच्यः शब्दकारस्तस्मात्परस्यां तेरनुदात्तत्वे कर्तव्ये स्थानिवद्भवतीति सिद्धो व्यपवर्गः। न च स्वरे
कर्तव्ये न स्थानिवदिति निषेधः शंक्यः। स्वरे दीर्घयलोपेषु लोपाजादेश एव न स्थानिवदित्युक्तेः। वस्तुतस्तु कृतेति तुम्यहणादसिद्धं बहिरंगमिति प
रिभाषाया अनित्यत्वादप्रवृत्तेः परत्वादस्मिन्स्वरे कृते एकादेशः प्रवर्तते। यथा यष्टिं तुपरमिति सूत्रे भाष्ये कैयटयोः प्राग्निघातः पश्चादेकादेश इति राम
स्थितत्वादिदं सिद्धं। पचति पचसि पचामि। पचतं पचथः पचथ पचसे पचते पचध्वे पचावः। पचामः पचामहे पचावहे इत्यत्र परत्वाद्दतोदी ३
र्घो यञि इति दीर्घे कृते पचदुपदेशाद्दिलुपदेशग्रहणादयं स्वरो भवत्येव। पचेते पचेथे इत्यत्र परत्वादियादेशे कृतेपि भवतीति वदयं स्वरः प्रवर्तते। ॥

© Dharmartha Trust J&K. Digitized by eGangotri

एवं पचंतौ पचेत पचेतां पचेरन्नित्यादौ शपः परस्य यासुट्सहितस्य सार्वधातुकस्यानुदात्तत्वं। यासुट उदात्तवचनं त्वाशीर्लिङि लुप्तविकरणेभ्यो वि
धिलिङि सावकाशं। पचेत पचेयातां पचेरन्नित्यादावपि शपः परस्य सार्वधातुकस्यानुदात्तत्वं। पचेत् पचेतात् पचेतां पचेन्नित्यादौ लोटि लङ्गुद्धस्वरोऽपवादः।
अपचत् अपचतां अपचन्नित्यादौ लङि शपः पित्वादनुदात्तत्वात्ततः परस्यानेनानुदात्तत्वात्सति शिष्टस्वरः प्रवर्तते। अजादौ त्वाट्स्वरः। एवमुत्तर
त्रापि। गोपायतीत्यादौ यशब्दाकारो धातुस्वरेणोदात्तः ततः परः शबनुदात्तः तयोरेकादेश एकादेशस्वरेणोदात्तः। गोपायतइत्यादौ यशपोरेकादेशस्व
रेतरंगत्वाद्धातुस्वर एकादेशं प्रतिसिद्धः तेन सोऽनुदात्तः। अगोपायतइत्यादौ [illegible] सतिशिष्टत्वादाद्युदात्तत्वमेव। एवं कुंडूयतीत्याद्यपि बोद्धव्यं। जुगुप्सती
त्यादौ सनो नित्वादाद्युदात्तत्वं। उक्तोदाहरणेषु यउदात्तस्तं वर्जयित्वा अन्येऽचोऽनुदात्तं पदमिति परिभाषयानुदात्ताः। तेषां घउदात्तादनुदात्तस्येति स्व
रितः। तस्मात्परेषां स्वरितात्संहितायामित्येकश्रुतिः। ननु यउदात्तादनुदात्तस्येति स्वरितः कृतस्तमाश्रायपूर्वस्योदात्तस्यानुदात्तत्वं प्राप्नोति। न च संनिपा
तपरिभाषया निर्वाहः शंक्यः। अनित्यत्वात्स्वरे तस्याः संनिपातपरिभाषाया अप्रवृत्तेर्वक्ष्यमाणत्वादिति चेत्सत्यं। कार्यकालपक्षे यंदोषः स्यात्। लक्ष्यानुरो
धेनानुदात्तं पदमिति परिभाषया धोद्देशो वाश्रीयते तेन स्वयं षाष्ठिकी परिभाषा उदात्तादनुदात्तस्येति स्वरितं त्रिपादी स्थं पश्यत्येव नेति नोक्तदोषः। दिवा
दिभ्यः श्यन्निकृते ञ्नित्यादिर्नित्यमित्याद्युदात्तत्वे कृते श्यनः परस्यादुपदेशात्परत्वादनुदात्तत्वे वक्तुर्यपि लकारे घाद्युदात्तान्येव रूपाणि दीव्यतीत्यादि। लस्य इ
स्वरेणाद्युदात्तानि अदीव्यतइत्यादि। तुदादिभ्यः शे कृते शस्य पित्वाभावादुदात्तत्वं धातुस्वरं बाधित्वा सतिशिष्टत्वाद्भवति। तस्माददुपदेशात्परं लसार्वधातु
कमनुदात्तमिति मध्योदात्तानि रूपाणि तुदति तुदतः तुदंति इत्यत्र तुरनुदात्तत्वे कृते एकादेशस्वरेण मध्योदात्तत्वं। लङि तु अड्स्वरेणाद्युदात्तत्वमेव अतुदत
इत्यादि। अत्र कोदयंति। परमपि टंलकारविशेषापेक्षत्वेन बहिरंगं बाधित्वा लकारसामान्यापेक्षत्वादंतरंगत्वात्। लादेशेषु कृते पुरस्ताद्पेक्षयानित्य
त्वाद्विकरणे भवति। विकरणे कृते शब्दांतरप्राप्त्याऽनित्यः। ततोऽट्। अस्यां प्रक्रियायां अट्स्वरस्य सतिशिष्टत्वाद तुदत इत्याद्याद्युदात्तं भवतु। यदा तु

स्वैत

© Dharmartha Trust J&K. Digitized by eGangotri

स्व॰रा॰शे॰ नेर्विशादिति स्तत्रस्थभाष्यकैयटोक्तप्रकार आश्रीयते शब्दान्तरादपि प्राप्नुवन्विधिरनित्यो भवतीति तदा विकरणस्याप्यनित्यत्वाद्द्वयोरनित्ययोः परत्वादटि पश्चा
४ द्विकरणे कृते सति शिष्टत्वाद्विकरणस्वरः प्राप्नोति। असुनुतां अतनुतां अक्रीणीतां इत्यादौ अट्स्वरेण तस्याहीनं शेषनिघाते कृते पश्चाद्विकरणे सति शिष्ट
त्वाद्विकरणस्वरः प्राप्नोति। यद्यपि असिद्धवदत्रस्थभाष्यप्रकारो लुङ्लङ्लृङ्क्ष्वडुदात्त इति द्विलकारकनिर्देशाद्धावस्थायामेवाडागमस्तदापि सतिशिष्टो
५ विकरणस्वरः प्राप्नोति। यदा चलस्य तिङ्सकृत्यनेनानुदात्तङित इति प्रकरणस्य घ्वेकयोरित्यस्यैकवाक्यताविधिपक्षस्तदा लादेशानां बहूपेक्षत्वेन
बहिरंगत्वादन्तरंगत्वादटि कृते पश्चादादेशेषु पश्चाद्विकरणे तु स एव दोषः। पक्षद्वयेऽपि चिनुतामित्यादौ प्रत्ययस्वरः प्राप्नोति। अट्स्वरस्याभवत्
अक्षात् अयावदत्यादिरवकाशः। तथा च स्वरभेदः प्राप्नोति। अत्रोच्यते। माहिसुन्वातां माहिन्वातां इत्यादौ अट्स्वरनिवृत्त्यर्थी माङ् बहु प्रयुञ्जानो भाष्य
कारो ज्ञापयति असतिशिष्टोऽप्यट्स्वरो विकरणस्वरं विकरणनिमित्तस्वरं च बाधते इति तेनाट्स्वर एव बलवान्। स्वादिभ्यः श्नुप्रत्यये तनादिभ्य उ प्रत्यये
च तिप्सिप्मिपां पित्वादनुदात्तत्वे श्नुप्रत्ययो प्रत्ययस्वरो शिष्यते। सुनोति तनोति तसादौ सति शिष्टोऽपि विकरणस्वरः सार्वधातुकस्वरं न बाधते किं तु सार्वधा
तुक एव स्वरो विकरणस्वरं बाधते इति वचनेन तसादिस्वर एव शिष्यते सुनुतः तनुतः। स्तु आयन्नादिषूपदेशिवद्वचनं स्वरसिद्ध्यर्थमिति वचनात् लवं प्रति
भावः पश्चात्प्रत्ययस्वरः। सुन्वंति तन्वंति एवं सर्वत्र ऊह्यं। लिङि यासुट्स्वरः। सुनुयात् सुनुयातां सुनुयुः। एवं तनुयात्। आत्मने पदे यासुट उदात्तवचनेना
गमाः अनुदात्ता भवन्तीति ज्ञापनात् सीयुटोऽनुदात्तत्वात् प्रत्ययाद्युदात्तत्वेन व्यवस्था। सुन्वीत सुन्वीयातां सुन्वीरन् इत्यादि। एवं तन्वीत। सुनोतु तनोतु ति
पः पित्वादनुदात्तत्वे विकरणस्वरः। तातङः ङित्त्वात् पिन्न भवतीति वचनादपित्त्वे निवृत्ते प्रत्ययस्वरेण व्यवस्था। सुनुतात् सुनुतां सुन्वन्तु सुनु अत्र सार्वधा
तुकाभावे विकरणस्वरः। एवमुत्तरत्र ज्ञेयं। लङि तु अट्स्वरेणाद्युदात्तत्वं माङ्योगे तु लङ्स्वरः। क्र्यादिभ्यः श्नाप्रत्यये सुनोतीत्यादिवत् स्वरव्यवस्था। क्रीणा राम
ति क्रीणीतः। ई हल्यघोरित्यत्र तपरकरणादत्र न सार्वधातुकानुदात्तत्वं नास्ति। रुधा[illegible]दानांति बाध्यपरे श्नम् इति कृते श्नमः प्रत्ययाद्युदात्तत्वे प्राप्ते

© Dharmartha Trust J&K. Digitized by eGangotri

तद्धितत्वागमाऽनुदात्ता भवंतीति प्राप्ते तस्मा धापतितस्तङ्गहणेनगृह्यत इति परिभाषया ध्वतोरंतोदात्तत्वेन अमएवोदात्तत्वं रूपादि। ननु आगमानुदात्तत्वं
सर्वस्वराऽपवाद इतिञेः सिद्धितिस्त्रेकैयटेनोक्तत्वात्कथमत्र धातुस्वरः। किं च धातुस्वरस्य पूर्वप्रवृत्तत्वात्कथं पुनः प्रवृत्तिः एवं तर्हि यासुडुदात्तवचनंतु स्वजा
तीयस्यप्रत्ययभिन्नस्यागमस्यानुदात्तत्वज्ञापनात्तस्मम् प्रत्ययस्वरो ऐवांतोदात्तत्वांत सादौ तु अमोदुपदेशात्परेषांतसादीनामनुदात्तत्वे अमसोरल्लोप इति
लोपतसादीनामुदात्तनिवृत्तिस्वरेणाद्युदात्तत्वंसिद्धं। रुंधः रुंधंति। यदि तसादीनामनुदात्तत्वंबाधित्वापरत्वात् अमसोरल्लोप इति मतं तथापि न क्षतिः। त
सादीनामपवादविषयेऽस्मिन्सति प्रत्ययस्वरात्प्रवृत्तौ अस्याल्लोपे कृते तेनुदात्तस्य चेत्यत्राविद्यमानोदात्तस्यानुदात्तस्य ग्रहणाद्धुदात्तनिवृत्तिः स्वरः सिद्धः। धका
र[illegible] स्तु स्वरविधौ व्यंजनमविद्यमानवदिति न व्यवधायकः। अमउदात्तत्वेवर्ज्यमामस्वरैंतसादीनामनुदात्तत्वं भविष्यतीति तु न युक्तं सति शिष्टोपि विक ए ६
रणस्वरः सार्वधातुकस्वरं न बाधत इति कृत्वा तस्मात्सर्वोक्तमेव संम्यक्। एवं निष्ठुन कारेषु स्वरऊह्यः। शिङ् अनेपदे तु रूपाः शई त इति स्थिते अदुपदेशादि
ति स्वरे कर्तव्ये धकारस्याविद्यमानत्वं नेष्यते तेन तासीयुटः अनिष्ठउदात्तनिवृत्तिस्वरो न। किं तु सार्वधातुकस्वर एव। लङ्गस्वरएव। रुधादिषु निङ् धादीते
खिदद्दै न्यो विद्विचारणे इति त्रयोनुदात्तेतः। पठ्यंते। एषां अमि कृते अदुपदेशादनुदात्तेत इति निमित्तद्वयेन सार्वधातुकस्यानुदात्तत्वेप्राप्ते। विंद। धिखि
द्भिन्नम्लसार्वधातुकस्यानुदात्तत्वं नेति वाच्यं। इंधीत खिंदीत विंदीत एभ्यो लिङ् स्तङो नुदात्तत्वे प्रतिषिद्धे प्रत्ययाद्युदात्तत्वे कृते तेन अमः स्वरेबा
धिते सीयुट आगमत्वादनुदात्तस्योदात्तत्वाभावे प्रत्ययाद्युदात्तत्वेन स्वरव्यवस्था। इंधी यातां इत्यादि रूपाणि। तृहि हिसि हिंसायामिति पठ्यते तस्य विशेष
स्वरो वक्ष्यते। चुरादिभ्यो णिचि धातुस्वरेण णिस्वरे व्यवस्थिते शबनुदात्तः। ततः परं सार्वधातुकमनुदात्तं तथा च णिस्वरेण व्यवस्था चोरयति इत्यादि।
लङि च्यद् स्वरः अचोरयत् अदादिभ्यस्तिबादिषु शपो लुकि तिप्सिप्मिपां पित्वादनुदात्तत्वाधातुस्वरेणाद्युदात्तत्वं अत्ति अत्सि अद्मि तसादीनां प्र
त्ययाद्युदात्तत्वं। अत्तः अदंति इत्यादि। लिङि यासुटउदात्तत्वं अद्यात् अद्यातां अद्युः। अत्ति तिपः पित्वादनुदात्तत्वं तातङो ङित्वादपित्वादुदात्तत्वं

© Dharmartha Trust J&K. Digitized by eGangotri

१ पद्यते। तत्राक्ङितेरिति प्रतिषेधस्त्वस्यया घुदात्तत्वमेव। यद्द्युते अघायाते अघायते। कुते ङि दुपदेशादितिव्याख्या तत्वादिहना सुनुतः क्रीणीतः। ननु आस्ते शेते १

स्व·रा·शे· हेरपित्वाद्दुदात्तत्वं। आद्‌सहितस्योत्तमस्यापि त्वाद्दनुदात्तत्वं तसादीनां प्रत्यया घुदात्तत्वमेव। अत्तु अत्तात् अत्तां अदंतु अपि अत्तात् अत्तं अत्त अदानि अ
५ दाव अदाम। लस्यात्‌ उदात्तत्वेनाघुदात्तत्वं। यत्तु अदः सर्वेषामित्यट् स आगमत्वाद्दनुदात्तः। आदत्‌ आत्तां इत्यादि एवं अस्ति स्तः संति। हंति हतः
घ्नंति हतः इत्यादौ अदुपदेशादितितस्यादीनामनुदात्तत्वं न भवति। अकारांतोपदेशादितितच्व्याख्या तत्वात् हशब्दस्योपदेशे ऽदंतत्वाभावात्
5 य४ प्रत्ययाप्रत्यययोः प्रत्यये संप्रत्यय इति परिभाषयानेह। जहि शत्रुं मंतिके। चकादिषु ईडीडते इत्यादयोऽनुदात्तेतः। तास्यनुदात्तेदित्यनेनानुदा
त्तेतः परं लसार्वधातुकमनुदात्तं इत्याघुदात्ता निरूपाणि ईट्टे ईड्‌जे ते ईडेते इत्यादि। अत्रङितोपि पठ्यंते। षङ् प्राणिगर्भविमोचने शीङ् स्वप्ने इ
त्यादि। तत्रापि तेनैव सूत्रेण ङितः परस्य लसार्वधातुकस्यानुदात्तत्वेनाघुदात्तानिरूपाणि सूते सुवाते सुवते शेते शयाते शेरते इत्यादि। अ
त्रैव इङ् अध्ययने कुङ् अपनयने इत्यादौ ऽनुषंगपरिहारार्थत्वात् ऽदुपदेशादिति लसार्वधातुकस्यानुदात्तत्वं सिद्धमेवेति दीर्घमनुदात्तेत्ङि ग्रह
णं। सत्यां तु षंविकरणमादाय दुपदेशादिति लसार्वधातुकस्यानुदात्तत्वं न भवतीति ज्ञापनार्थं। तेन अत्तः इत्यादौ सिद्धं। अदादिषु स्वपा
दयः पठ्यंते। स्वपादिहिंसामच्यनिटि। स्वपादीनां हिंसेश्चादिरुदात्तो वा स्यादनि [illegible] घजादौ लसार्वधातुके परे। स्वपंति स्वपंति। पक्षे प्रत्यया
घुदात्तत्वेन मध्योदात्तत्वं। हिंसति हिंसंति। अयं रुधादिः। अनिटि किं। स्वपितः। रुदादित्वादिट्। अजादौ किं। स्वप्यात् हिंस्यात्‌ नेति किं च। नशि
स्वपानः। सार्वधातुके किं। सुषुपतुः। ङित्यजादाववयं विधिरिष्यते। इह न भवति स्वपानि हिनसानि इति काशिका। नेतत्काव्येदृष्टं। आगणांतास्व
पादयः। ञिष्वप् शये श्वस प्राणने अन च। रुदिर् अश्रुविमोचने। जक्ष भक्षहसनयोः। जागृ निद्राक्षये दरिद्रा दुर्गतौ च। चकास्दीप्तौ शासु अनुशिष्टौ अथ षष्ठिवंदसाथ॥ राम
दीधीङ् दीप्तिदेवनयोः। वेवीङ् वेतिना तुल्ये अषट्कयः परस्मैपदिनः। षस सस्ति स्वप्ने वशकांतौ। चर्करीतं च। कुङ् अपनयने इति तत्राधानां त्रया
५

© Dharmartha Trust J&K. Digitized by eGangotri

णामप्यविकृतस्य:। ऊर्णुहित्यादौ। नाभ्यस्तानामभ्यस्तत्वाभावात्परत्वादभ्यस्तानामादिरित्याद्युदात्तत्वेन न भाव्यं। घसिवशी छांदसौ दृष्टानुविधिश्छंदसि। चर्करीतं चाभ्यस्त
मेव। कुर्कुरो प्ययं विकल्पेन अत्रा‌ङ्कितु ऊोरित्यनुवृत्तेरिति हरदत्तः। नैतद्भाष्ये दृष्टं। तस्मात्कुर्णुवाते इद माद्युदात्तत्वं मध्योदात्तत्वं न तद्विषयत्वेव। कादिभ्यः शपः श्लौ
कृते। भीह्रीभृहु मद ऊन धन दरिद्रा ऊगराञ्जत्यपात्सर्वं पिति। भ्यादीनामभ्यस्तानां जसार्वधातुके पिति परे प्रत्ययात्सर्वमुदात्तं स्यात्। अनुदात्ते चेत्यस्यापवादः
वादः। बिभेति जिहेति। बिभर्त्ति। अस्त्वन्वं तं यदन स्क्षा बिभर्त्ति। अत्र छांदस माद्युदात्तत्वं। जुहोति। ममत्तु नः परिज्मा। ऊजन्नदिंज। माता यद्वीरं दधनत्।
दरिद्राति। जागर्षि त्वं। अत्र मदि दिवादिस्तस्य शपः श्लुश्छांदसः। जागर्दरिद्रा वदादौ। अन्येषु होता दयः। जनजननेः। धनधान्ये। आभ्यां लेट्। तिपृ इत्तथ्य
लोप इतीकारलोपः। लेटो जटाविति अट्। शपः श्लुः भ्यादीनां किं। ददाति। अनुदात्ते चेति बाधित्वेदं मा भूत्। अभ्यस्तानां किं। माधयति। लेकिं। बिभेतिः। बहुलं
छंदसीति। सार्वधातुके किं। बेभीयात्। बिभेत्यादौ नायं। जुहुतां नाभ्याशीर्लिङ्ग्यासुटः पूर्वमुदात्तत्वं माभूत्। पिति किं। जुहुतः। अत्र प्रत्ययाद्युदात्तेनांतोदा
त्तत्वं। अप्रत्ययादिति किं। प्रत्ययात्सर्व एवउदात्तोयथास्यात्संघातः पर्याय एणोदात्तो माभूत्। त्येवमर्थं क्रियमाणं ज्ञापयति स्वरविधौ संघातः कार्यी भव
तीति तेन सुवर्णादित्यादौ आताम् शब्दस्याडि तः परस्य सर्वस्यैवानुदात्तत्वं भवति। प्रत्यये पितीत्येव सिद्धे पूर्वग्रहणं ज्ञापयति सोवर्ण्यः स तम्यस्त्वदंत सवम्यस्
ति। तेनोपोत्तमं रितिवक्ष्यत्यतरस्यां अत्रति दंत स्पर्शात्तस्य त्यर्थो भवति। अनुदात्ते च। अविद्यमानोदात्ते लसार्वधातुके परे भ्यस्तानामादिरुदात्तः
स्यात्। बोभोति बोभवीति दधाति ददाति जिहीते मीमिते। ऊहाङ् माङो ङित्वात्ततः परस्य लसार्वधातुकस्यानुदात्तत्वे हि तेस्य प्रवृत्तिः। एवं दीधीते दीध्याते वेवी
ते विव्याते। अनुदात्ते चेति बहुव्रीहिनिर्देशो लोपार्थः। मा स्म दधात्। अत्र नित्यत्वादिकारलोपे कृते प्ययं स्वरः प्रवर्तते एव। अभ्यस्तानां किं। ऊर्णोति। अ
भ्यस्तानामादिः। अभ्यस्तानामादिरुदात्तः स्याद निघजादौ लसार्वधातुके परे। ददति। बोभुवति जग्रति जाग्रति दरिद्रति वव्रासति शासति दीध्याते
वेव्याते। अत्र परत्वादनुदात्ते चेत्यनेनाद्युदात्तत्वं। जुह्वति। अभ्यस्तानां किं। ऊर्णुवंति। आदिरित्यनुवर्त्तमाने पुनरादिरिति विकृतस्य निवृत्त्यर्थं। अनिटि किं।

© Dharmartha Trust J&K. Digitized by eGangotri

जुहुतः। अजादेरिति किं। जुकुतः। लोतिति किं। दद्धानः। वानरायां सार्वधातुकेति किं। जजहे। जिङ्यासुदुत्स्वरः। दद्यात् दद्यात्तां इत्यादि। लोटि पिस्तुवचनेषु अनुदात्ते चेत्या
घुदात्तत्वे। तातङादिषु अभ्यस्तस्याद्युदात्तत्वे। अजादेस्तु अभ्यस्तानामादिरित्याद्युदात्तत्वमिति विवेकः। लोङि अट्स्वरेणाद्युदात्तत्वं। उ एर्नोतोस्तादेर्नाभ्यस्तस्वरः
अभ्यस्तानां प्रत्ययस्वराविधानात् एकस्मिन्पदे द्वयोरुदात्तत्वाभावात्। द्वितीयस्य तृतीयस्य वोदात्तत्वं पिति अन्यत्र प्रत्ययस्वरः। सर्वेभ्यो धातुभ्यो भावकर्म
णो लकारोत्पन्नो यक्ति कृते उपदेशात्परं लसार्वधातुकं अनुदात्तत्वे कृते यक्स्वरेणाव्यवस्था। हूयते अघेत हूयतां। अहीयते तत्प्रत्ययात् स्वरः। अचः कर्तृ
यकि। उपदेशेऽजन्तानामादिरुदात्तो वा स्यात् कर्त्तरि यक्परे। लूयते केदारः स्वयमेव। आद्युदात्ताभावे यक्स्वरेण मध्योदात्तः। उपदेशे किं। स्तीर्यते स्तीर्य
ते केदारः स्वयमेव। अत्र परत्वादित्वे कृतेऽपि यं स्वरो यथा स्यात्। ये विभाषेत्यत्रानुदात्तोपदेशवनतीत्यत उपदेशे इत्यनुवृत्त्या यकारादिश
त्यये विवक्षिते पूर्वमेव जनादीनामात्वं विधीयते। तेनु जायते स्वयमेव सायते खायते वा स्वयमेवेत्यत्राप्ययं स्वरो भवति। अकर्मकेऽजनिरन्तर्भा पि
वितण्यर्थः कर्मकर्तृविषयः। लुङि तिबादिषु स्त्रियुजि ञ्जेः सिच्। माहिपठीत् पठिष्टां पठिषुः। अत्र। चितः। अत्र वार्त्तिकं। चितः प्रकृतेरिति वाच्यं। चितः
प्रकृतिप्रत्ययसमुदायस्यान्त उदात्तः स्यात्। सिच उदात्तत्वभाजो भावाच्चित्करणादागमानुदात्तत्वं बाधित्वा इट उदात्तत्वं भवति। तत ईटा एकादे
शे एकादेश उदात्तः। आदिः सिचोऽन्यतरस्यां। सिजन्तस्यादिरुदात्तो वा स्यात्। माहि कार्ष्टीं। आद्युदात्ताभावे प्रत्ययस्वरेणान्तोदात्तः। माहिकार्षी
दित्यत्र तु एतदभावेऽपि इट आगमत्वादनुदात्तत्वाच्चितः सप्रकृतेरिति वचनादाद्युदात्तत्वमेवेति न विशेषः। पुठीत् पठिष्टां इत्यादावप्ययं सत्यां
विकल्पः। परत्वाज्ञवत्येव। अनिटः सिचः परस्य पित उदात्तत्वं वा वाच्यं। माहि कार्षं पक्षे आद्युदात्तत्वं पक्षेऽन्तोदात्तं। अन्यथा धातुस्वरेण नित्यमा
द्युदात्तं स्यात्। ननु माहिकार्षमितिवन्माहिकार्षीदित्यत्राप्ययं स्वरः प्राप्नोति तिपः पित्वात् तदुक्तत्वादीट इति चेन्न। आगमानुदात्तत्वं सर्वस्य स्व राम
रस्य बाधकं अविशेषान्न तस्यान्यत्र चरितार्थत्वं चित्करणसामर्थ्यादागमानुदात्तत्वं बाध्यते इति ज्ञेः सिद्धिरिति सूत्रे कैयटेन सिद्धान्तितत्वात्। अतए

© Dharmartha Trust J&K. Digitized by eGangotri

वविकरणस्वरः सार्वधातुकस्वरं न बाधते इति न्यायेन न प्रवर्त्तते। शलइगुपधादनिटः क्सः। माहि धुक्षत धुक्षतां। इत्यादौ अदुपदेशादिति न सार्वधातु
कस्यानुदात्तत्वे क्सस्योदात्तत्वेन व्यवस्था। धुक्षानित्यादौ यत्र क्सस्याचीति लोपः संभावितस्तत्र सार्वधातुकस्यापवादविषयत्वात् तस्य धातुदात्तत्वाभावे
एतदनुदात्तत्वपरत्वाद् अधिद्वा क्सस्य लोपे कृते पि उदात्तनिवृत्तिः स्वरो भवति। अविद्यमानस्योदात्तस्यानुदात्तस्य तत्र ग्रहणात्। यत्र लुग्वा दुह
इति लुक् तत्रादुपदेशादिति स्वरो नास्ति। तस्मिन्नेव सस्वरे अनुदात्ते ङ्किद्ग्रहणेन लुग्विकरणं गृहीत्वा दुपदेशादिति स्वरो न प्रवर्त्तत इति ज्ञापितत्वात्।
तथा च प्रत्ययाद्युदात्तत्वं माहि दुग्धं दुहहि। णिश्रीति चङ्। चङ्यन्यतरस्यां। चङन्तस्योपोत्तमं उदात्तं वा स्यात्। णावादीनामंत्यमुत्तमं तस्य समीपमुपोत्त
मं। माहि वीकरत वीकरतां। पक्षे अदुपदेशादित्यनुदात्तत्वे चङ एव स्वरः शिष्यते। माहि वीकरन् इत्यादौ यत्रैकादेशोत्तरंगस्तत्रापि पिपचतीत्यत्रोक्तन्याये
न पूर्वमदुपदेशादित्यनुदात्तत्वे एकादेश उदात्तः। एवं माहि दुद्रुवत दुद्रुवतां दुद्रुवन् इत्यादि ज्ञेयं। उपोत्तमं किं। विभाषा धेट्श्व्योरिति चङ्। माहि दधत
दधतां दधन् इत्यादौ चङ एव स्वरः। एवं अस्यतिवक्तिख्यातिभ्योऽङ्। माहि अस्यत अस्यतां अस्यन् माहि वोचत वोचतां वोचन् इत्यादौ अङ एव स्वरः।
चिण्ते पदः। माहि पादि। दीपजनि इत्यादौ सार्वधातुकाभावाच्चिण एव स्वरेणान्तोदात्तत्वं। धातोः लिति। सिबादीनां णलाद्यः लिति। लिति प्रत्य
यात्पूर्वमुदात्तं स्यात्। बभूव जघान जघनन्। चकार तस्थौ। अत्र लित्स्वरे कृते एकादेश उदात्तः। चक्रतुः इत्यादौ प्रत्ययाद्युदात्तत्वं। थलि च सेटीडु
तो वा। अजन्ते थलि विहितो यस्थल् सेट् ततदन्ते पदे इड्न्तं आदिर्वा उदात्तो वा स्यात्। पक्षे लित्स्वरोपि। तेन लुलविथेत्यत्र चत्वारोपि पर्या
येणोदात्ताः। यूयिथ अत्र त्रयः पर्यायेणोदात्ताः। थलि किं। लुलुविव अत्र प्रत्ययस्वर एव। चेत्यन्यतरस्यां ग्रहणानुवृत्त्यर्थं। सेटि किं। ययाथ
इड्ग्रहणं तु यदेजागमः क्रियते तदातस्योदात्तार्थं स्यात् सेड्ग्रहणं तु सेघेवायं स्वरो भवति। ययाथेत्यत्र लित्स्वरः। अजन्तेभ्यः किं। बिभेदिथ।

© Dharmartha Trust J&K. Digitized by eGangotri

स्व·रा·शो· वाग्रहणं कार्यिविकृत्यार्थं अनपाकृतयोरेवेडं तयोर्विकल्पः स्यात् आदेर्न स्यात्। वक्रिरेऽत्र वित्वाद्दंतोदात्तत्वं। अन्यत्र प्रत्ययाद्युदात्तत्वं। वक्राते। धातोराशी
७ र्लिङि यासुट उदात्तत्वे न व्यवस्था। जागर्यात् जागर्यास्तां जागर्यासुः। आत्मनेपदे सीयुट् आगमत्वादनुदात्तत्वे प्रत्ययाद्युदात्तत्वेन व्यवस्था। कृषीष्ट
7 कृषीयास्तां कृषीरन् इत्यादि। धातोर्लुट् दस्तिबादयः पदद्वयेपि प्रथमस्य डारौरसः। तास्यनुदात्तेदिति तासेः परस्य लसार्वधातुकस्यानुदात्तत्वे तासि
स्वर एव शिष्यते। तत्रतिपः पित्वादनुदात्तस्यानुदात्ते डादेशे कृते डित्वाट्टिलोपे उदात्तनिवृत्तिस्वरेण कर्त्तेत्यंतोदात्तं तशब्दस्यांतरंगत्वात् डादेशे
कृते परत्वाट्टिलोपे उदात्तनिवृत्तिस्वरेणांतोदात्तं कर्तेति। कर्त्तारौ इत्यादितासिस्वरेण मध्योदात्तानि रूपाणि ज्ञेयानि। अत्रेदमवधेयं। परत्वा
त्प्रमात्रापेक्षत्वेनांतरंगत्वाच्च डादेशे कृते पुस्पतासीति तासिः क्रियते। अस्मिन्पक्षे सति शिष्टत्वात्तासिस्वरे सिद्धे तासेः परस्य लसार्वधातुक
स्यानुदात्तवचनं ज्ञापयति सतिशिष्टोपि विकरणस्वरः सार्वधातुकस्वरं न बाधत इति। यदा तु लस्येति षष्ठ्यंत्यस्यानुदात्तङित इति प्रकर
णेनैकवाक्यता तदाऽस्य बहुपेक्षत्वेन बहिरंगत्वादंतरंगत्वात्तासौ कृते तिबादयः क्रियंते तदा सतिशिष्टत्वात्सार्वधातुकस्वरे प्राप्ते तासेः
परस्य लसार्वधातुकस्यानुदात्तत्वं विधीयते। अस्मिन्पक्षे सतिशिष्टोपि विकरणस्वरः सार्वधातुकस्वरं न बाधत इति वाचनिकं। धातोर्लृट्
स्यप्रत्यये इडुपदेशादिति लसार्वधातुकस्यानुदात्तत्वे कृते स्यस्योदात्तत्वे न पदद्वयेपि व्यवस्था एकादेशोत्वेकादेश स्वरेण। करिष्यति क
रिष्यतः करिष्यंति करिष्यते करिष्येते करिष्यंते। धातोर्लृङि पदद्वये पदस्वरेणाद्युदात्तत्वं। अकरिष्यत् अकरिष्यतां अकरिष्यत अकरिष्ये रि २
तां इत्यादि। पदस्य पदात् अनुदात्तं सर्वमपादादावित्यनुवर्त्तमाने। तिङ्ङतिङः। अतिङंतात्पदात्परं अपादादौ वर्त्तमानं तिङंतं नि
न्यते। सर्वानुदात्तानिघात इति वैयाकरणानां व्यवहारः। अग्निमीले। अस्य पदविधित्वात्समर्थः पदविधिरिति परिभाषया सामर्थ्ये सत्येवा राम
७

© Dharmartha Trust J&K. Digitized by eGangotri

यंनिघात इति प्राप्ते। समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्याः। भिन्नवाक्ये सत्यपि सामर्थ्ये निघातो न। एकस्मिन्वाक्येऽसत्यपि सामर्थ्ये यंनि
घातस्येतदर्थमिदं। अयं दंडो हरानेन। अत्रानेनेत्यनेन दंडस्य परामर्शः सामर्थ्ये सत्यपि अयं दंडोऽस्तीति गम्यमानत्वाद्भिन्नवाक्यत्वादेत
स्यन निघातः। शालीनां भविष्यत्योदनः। अत्र भविष्यतीत्यस्य शालीनामित्यनेनासामर्थ्येऽपि निघातः। आख्यातं साव्ययकारकविशेषणं वा
क्यमिति वाक्यं परिभाषितं। आख्यातमित्येकत्वं विवक्षितं संख्याविशेषणसामर्थ्यात्। तदाख्यातं प्रयुज्यमानं अप्रयुज्यमानं वास्तु। अव्ययका
रकविशेषणानि त्वेकं समुदितानि वाश्रीयन्ते। अहकुघाङ्नुभवत्। अतिङः किं। पचति भवति। एककर्तृका पचिक्रिया भवतीत्यर्थः। ननु आ
ख्यातमित्येकत्वस्य विवक्षितत्वादेकवाक्यत्वाभावादेव न भविष्यति। सत्यं। अत एव भाष्येऽतिङ इति प्रत्याख्यातं। अपादादौ किं। त्वं वाजे
षु वाजिनं वाजयामः शतक्रतो। स्वरविधौ संघातः कार्यो भवतीति ज्ञापितत्वात् सर्वग्रहणं किं। युष्मदस्मद् यदि तस्य सर्वस्य पदस्यादेशाय पा
स्तु रित्येवमर्थं। न लुट्। पदात्परं लुडन्तं नानिहन्यते। श्वः कर्ता। निपातैर्यद्यदिहन्तकुविन्नेच्चेच्चण्कच्चिद्यत्रयुक्तं। यदादिभिर्निपातैर्युक्तं
तिङन्तं न निहन्यते। यद्यदापर्यवहितौ वा। यदग्ने स्यामहं। स्यामिति लिङ्। अम। विचारे यदि चेच्चणः। यदि करोति। हन्त हर्षेऽनुकम्पायां वाक्या
रंभविषादयोः। हन्त करोति। हन्ताहं पृथिवीमिमां निदधानीह वेह वा। अत्र दधानीत्यस्य निघातश्छान्दसः। प्रशंसायां कुविन्स्मृतः। कुवि
त्करोति। नेन्निषेधे। नेच्चेच्छौ निपातसमुदायौ। नेद्देवमायुनजन्नत्र देवाः। अन्यस्येन्नाभिगच्छति। नइत्व इत्पदकाले विच्छिद्य पाठः।
युनजन्निति युजिर्योगे लेटि रूपं। तमसो लोपाभावश्छान्दसः। अनुपदेशादित्यन्तेन निघातः। इदंश्चमल्लयातिनः। इदंम्येदस्मान्सुखयेद्दि
त्यर्थः। चेदर्थ एव चवरा होणित्। समुच्चयादौ त्वणिदिति तस्य ग्रहणाभावः। कच्चित्कामे। आविन्दिभिप्वक्रमा कच्चिद्दागः। अयमपि निपात

© Dharmartha Trust J&K. Digitized by eGangotri

स्व·रा·शे· समुद्र यः कत्व विदिति पद काले विविघपाणत्। यत्राधारे। पुत्रासो यत्रपितरो भवंति। निपातैः किं। यत्कूजति शकटं। एती तिू यत् इणः शतरि इणो यण्।
८ यद्भ्जानिन्नित्यमित्यपि न भवति। तत्र दांतस्य ग्रहणात्। ननु निपातैः साहचर्यात् इति पदोक्तस्याव्ययद् पिनिपात एव ग्रहीष्यते। एवं तर्हि ज्ञापनार्थमस्मि
४ न्प्रकरणे उक्तरीत्या संकोचो नेति। तेन या वघपाभ्यामित्यत्र वर्त्तं तस्यापि ग्रहणं भवति। युक्तं किं। यत्र क्वचते मनो दक्षं दधसे उत्तरं। यत्रेत्यस्योत्त
रमित्यनेन न संबंधः। दधसे धारणे अनुदात्तेत्। नह प्रत्यारंभे। नह शब्दो निपात समाहारो निषेधे वर्त्तते। तेन युक्तं तिङंतं प्रत्यारंभविषये
न निहन्यते। नह भोक्ष्यसे। पूर्वं भुक्त्वे तु रूपे पुनः क्रोधेनोपहासेन वा पुनः प्रतिषेधयुक्तं पृच्छ्यते किं भो ऽतं न करिष्यसि स प्रत्यारंभः। अन्यत्र नह
वैतस्मिन् लोके दक्षिणामिच्छति। सत्यं प्रश्ने। प्रश्नविषय सत्य शब्देन युक्तं तिङंतं न निहन्यते। सत्यं भोक्ष्यसे। प्रश्ने किं। सत्यं वदामि नाहं तं। अं
गात्याति लोम्ये। अंगशब्देन युक्तं तिङंतं न निहन्यते आनुकूल्ये गम्ये। अंग कुरु। अप्राति लोम्ये किं। अंग कूज वृषल। कूजनमनभिप्रेतमस्यो कु
र्वन्प्रतिलोमो भवति। उदाहरणे अंगशब्दो ऽनुज्ञायां प्रत्युदाहरणे त्वमर्षे। हि च। हि शब्देन युक्तं तिङंतं न निहन्यते आनुकूल्ये गम्ये। आ हि ष्मा
याति वरुणः। याति कूल्ये तु हि कूज वृषल। हि शब्दो ऽवधारणे हेतौ वा प्रत्युदाहरणे त्वमर्षे। छंदस्यनेकमपि साकांक्षं। हि शब्देन युक्तं साकांक्षं
मेकमनेकं च तिङंतं नानुदात्तं स्यात्। कदाचिदेकं कदाचिदनेकमिति सर्पिः। अनृतं हि मत्तो वदति पाप्मा एनं पुनाति। हिर्यतेत्यस्यापि यतोयं
मत्तो नृतं वदति ततः पाप्मा पापं एनं पुनाति व्याप्नोतीत्यर्थः। अनृतवदन दोषेण युज्यत इति तात्पर्यार्थः। तिङंतद्वयमप्येतन्नानिहन्यते। अ
ग्निर्हि पूर्वमुदजयत्तमिंद्रोनूदजयत्। अत्रैकमजयादित्याद्युदात्तमपरं निहतं। अत्र हेतुहेतुमद्भावस्य द्योतको हिरित्यनेकमपि तिङंतं हियुक्तं
भवति। तत्र पूर्वेण सर्वस्य निपातप्रतिषेधे प्राप्ते कदाचिदेकस्य कदाचिदनेकस्य यथा स्यादिति वचनं। तत्र छंदसि दृष्टानुविधानाद्यथा प्रयोगं व्यवस्था॥ राम

© Dharmartha Trust J&K. Digitized by eGangotri

यावद्यथाभ्यां। आभ्यां युक्तं तिङन्तं न निहन्यते। यावद्धो निपातस्थो निपातस्वरत्वते निपातैर्यद्यदितिस्थापितत्वात्। आद्यः सा कस्ये। द्वितीपरि माणोपाधि
कोवत्तुवंतः। यथायोग्यतादिषु। यावद्भुङ्क्ते। देवदत्तः पचति पावृत्। अनिपातः। यावत्तोट्टभ्यो अरदोगुणाना। रदाविले खने। नञि सिपि अट्।
यथाभुङ्क्ते। देवदत्तः पचति यथा। पूजायां नानन्तरं। यावद्यथाभ्यां युक्तं अनन्तरं तिङन्तं पूजायां विषये अनिहतं न स्यात्। पूर्वेण प्राप्तस्य निषेधः॥
यावत्पचति चारु यथा पचति चारु। पूजायां किं। यावद्भुङ्क्ते। यथाभुङ्क्ते। अनन्तरं किं। यावद्यथा वा विष्णुमित्रः करोति चारु। पूर्वेण त्र निपातप्रतिषेधः
उपसर्गव्यपेतं च। यावद्यथाभ्यां युक्तं अनन्तरमुपसर्गेण व्यवहितं तिङन्तं पूजायां विषये अनिहतं न स्यात्। उपसर्गव्यवायार्थमिदं। यावत्प्रपचति
शोभनं। यथा प्रकरोति चारु। अनन्तरं किं। यावद्देवः प्रकरोति चारु। तुपश्यपश्यताहैः पूजायां। एतैर्युक्तं तिङन्तं नानुदात्तं स्यात्पूजायां। तु माणवको
भुङ्क्ते शोभनं। पश्य माणवको भुङ्क्ते। पश्यत माणवको भुङ्क्ते। आहह स्वधमनु पुनर्गर्भत्वमेरिरे। पूजायां किं। पश्य मृगो धावति। तत्वकथनमेतत्
प्रतिषेधप्रतिषेधेनानन्तरमित्यनेन च संबन्धः। पूर्वं पूजायहणं तदनुवृत्तौ सर्वमनुवर्त्तेत। तथा च निपातैर्यद्यदिहन्तादि प्रतिषेधस्य प्रतिषेधोयं
संभाव्येतेति तन्निवृत्त्यर्थं पूजायहणं। अहो च। अहो शब्देन युक्तं तिङन्तं नानुदात्तं स्यात्पूजायां। अहो देवः करोति शोभनं। यथायोगकरण
मुत्तरार्थं। शेषे विभाषा। अहो शब्देन युक्तं तिङन्तं वानुदात्तं न स्यादपूजायां। कटमहो करिष्यसि। पक्षे सप्रत्ययस्वरः। अनाश्चर्यभूतमेववत्सु
असूयता आश्चर्यवन्निपात्यते न पूजा। शेष इति विस्पष्टार्थं। पूर्वसूत्रे पूजायामित्यस्यानुकृष्टत्वादिहाननुवृत्तेः सिद्धत्वात्। पुरा च परीप्सा
यां। पुराशब्देन युक्तं तिङन्तं वानुदात्तं न स्यात्त्वरायां। अधीष्व माणवक पुरा विद्योतते विद्युत्। पुरा विद्योतत इति वा। यावत्पुरेति भविष्यति। लट्
विद्योतनात्पूर्वमध्ययनं प्रतिषिद्धमतस्त्वरोप न्यासे न त्वरितमध्येतीति गम्यते। पक्षे द्योतत इत्याद्युदात्तं। परीप्सायां किं। नत्वेन स्म पुराधीयते॥

© Dharmartha Trust J&K. Digitized by eGangotri

स्व·रा·शो· लट् स्मे इति भूते लट्। भूतसाध्ययनस्य विरक्तस्य प्रवृत्तत्वं गम्यते। नत्वरा। नन्वित्यनुज्ञैषणायां। किंचित्कर्तुं स्वयमेवोद्यतस्यैवं क्रियतामित्यभ्युपगमोऽनु
८ ज्ञातस्याः प्रार्थनानुज्ञैषणा। तस्यां गम्यमानायां ननुशब्देन युक्तं तिङन्तं न निहन्यते। ननु करोमि भोः। ननु गच्छामि भोः। करणं गमनं च प्रतिमामाज्ञापये
तिगम्यते। वर्त्तमानसामीप्ये लट्। अनुज्ञैषणायां किं। अकार्षीः कटं देवदत्त ननु करोमि भोः। ननौ पृष्टप्रतिवचने भूते लट्। ननु शब्दस्यैव निपात
त्वं द्योतयितुमिति शब्दः। किं क्रियाप्रश्नेऽनुपसर्गमप्रतिषिद्धं। क्रियाप्रश्ने यः किंशब्दस्तेन युक्तं तिङन्तमनुपसृष्टमप्रतिषिद्धार्थकमनुदात्तं न स्यात्।
किं देवदत्तः पचति आहोस्वित्पठति। अत्र केचिदाहुः पूर्वं तिङन्तं किंयुक्तं तत्समीपे किमः श्रूयमाणत्वादिति न निहन्यते। उत्तरं तु न किंयुक्तमिति
निहन्यत एवेति। अपरे आहुः। यद्यप्येकस्याख्यातस्य समीपे किंशब्दः श्रूयते तथापि संशयविषयस्य तेन योग इति उभयत्रापि निषेधेन भाव्यमिति
हरदत्तस्यैवं मतमभिप्रेतं। तथाहि। अस्तु द्वयोः संशयविषयत्वं किंशब्दे न तु एकतक्रियाविषय एव प्रश्नो द्योत्यते क्रियान्तरविषयस्तु प्रश्न आ
होस्विदित्यनेन। क्रियाप्रश्न इति वोच्यते। तस्मात्तस्यैव निघातप्रतिषेध इति। क्रियेति किं। साधनप्रश्ने माभूत्। किं देवदत्तः शाकं पचति आहोस्वि
दोदनं। प्रश्ने किं। किं पठति देवदत्तः। क्षेपे किंशब्दः। किमधीते यं इति हत्युक्तं न प्रत्युदाहरणं उपसृष्टत्वात्। अनुपसर्गे किं। किं देवदत्तः प्रपचति २५
आहोस्वित्प्रकरोति। अप्रतिषिद्धं किं। किं अयं न करोति आहोस्विन्नपठति। लोपे विभाषा। क्रियाप्रश्ने यः किंशब्दस्तस्य लोपे तद्युक्तं अ
नुपसर्गमप्रतिषिद्धं तिङन्तं वा नानुदात्तं स्यात्। सूत्रेण किमो लोपस्याविधानादर्थप्रकरणादिना गम्यमानार्थत्वादप्रयोग एव लोपो विव
क्षितः। अयं पचत्याहोस्वित्पठति। निहतमाद्युदात्तं वा। किंशब्दाप्रयोगात्प्राप्तविभाषेयं। यद्या तस्याप्रयोगेऽप्यर्थे न योगात्प्राप्तविभाषा। ए राम
वं सूत्रस्थानि प्रत्युदाहरणानि किंशब्दे त्यक्ते प्रयोजनीयानि। एहि मन्ये प्रहासे लृट्। एहि मन्ये ते न समुदायेन युक्तं तिङन्तं परिहासेन निहन्यते।

१ ल ए

© Dharmartha Trust J&K. Digitized by eGangotri

एहि मन्ये ओदनं भोक्ष्यसे भुक्तः सोऽतिथिभिः। एहि मन्ये रथेन यास्यसि यातस्तेन पिता। मन्यसे भोक्ष्य इत्यर्थे प्रहासे च मन्योपपदे मन्यतेरुत्तम एकवच्चेत्यनेन नम
न्ये भोक्ष्यसे इति। प्रहासे किं। एहि मन्यसे रथेन यास्यसि। त्वं रथेन यास्यसीत्यहं मन्ये। एहीत्युपसर्गः। वृत्तिकारास्तु मन्यस्तुत्तमस्यापि विवक्षितत्वादेहि मन्यसे ओदनं
भोक्ष्येऽहमपि प्रत्युदाहरणमिति आहुः। एहीत्युपसर्गात्पर्यायाग्र्यर्थोऽत्र लोकेवासिष्ठ एहि मन्ये युक्ते प्रहासे एव नानिहन्यते इति नियमार्थमिदं। जात्वपूर्वं। अवि
द्यमानपूर्वेण जातुना युक्तं तिङन्तं नानिहन्यते। जातु करिष्यसि। अपूर्वं किं। कटं जातु करिष्यसि। अपूर्वमिति जातुशब्दस्यैव विशेषणं न तिङन्तस्येति म
घादौ स्थितं। किंवृत्तं च चिदुत्तरं। उत्तरडतमप्रत्ययान्तं विभक्त्यन्तं च किमो रूपं किंवृत्तं। विद्यते चिदुत्तरो यस्मात्तेनापूर्वेण किंवृत्तेन युक्तं तिङन्तं नानुदात्तं स्यात्।
कश्चित्केचित्किंचित्केन चित्कस्मै चित्कतरश्चित्कतमश्चिद्ददाति। अभ्यस्तत्वादाद्युदात्तः। अपूर्वं किं। अयं किं चित्पचति। चिदुत्तरं किं। को भुंक्ते। आहो
उताहो चानन्तरं। आभ्यामपूर्वाभ्यां युक्तमनन्तरं तिङन्तं नानिहन्यते। आहो भुंक्ते उताहो भुंक्ते। उतावधीतेति नोदाहरणं मध्येऽभिभावादनन्तरत्वाभा
वात्। अपूर्वं किं। अयमाहो भुंक्ते। अनन्तरं किं। शेषे विभाषा वक्ष्यति। ननु अपूर्वमित्यनुवर्त्तमानात्सपूर्वे तिङन्तं शेषे भाविष्यतीति किमनन्तरस्य
ग्रहणेन। एवं तर्हि इदमेवानन्तरमिति ज्ञापयति अपूर्वमिति न तिङन्तस्य विशेषणमिति तेन पूर्वेस्तत्रह्यार्थः सिद्धो भवति। शेषे विभाषा। आहो
उताहोभ्यां अपूर्वाभ्यां युक्तं व्यवहितं तिङन्तं वानुदात्तं न स्यात्। आहो अयं पचति। उताहो अयं पचति। पक्षे आद्युदात्तं पक्षे निहतं। अयमाहो
देवो वर्षति। इदं निहन्यते। गत्यर्थलोटा लृण्न चेत्कारकं सर्वान्यत्। गत्यर्थेभ्यो यो लोट् तदन्तेन युक्तं लृडन्तं नानुदात्तं स्यात्। लोट्लृटोर्यद्येकं कारकं
सर्वं चेदन्यन्न भवति। आगच्छ देवदत्त ग्रामं द्रक्ष्यसि। उह्यतां देवदत्तेन शालयो यज्ञदत्तेनैव शालयो भोक्ष्यन्ते। वाच्यं किं। इहापि यथा स्यात्। आ
गच्छ देवदत्त ग्रामं ओदनं भोक्ष्यसे। उह्यतां देवदत्तेन शालयो यज्ञदत्तेन भोक्ष्यन्ते। इह यद्यपि कर्मकर्त्रोर्भेदोऽस्ति तथापि वाच्यकर्तृकर्मभेदो नास्तीति न
वा सेवानिघातप्रतिषेधः। इह तु प्रत्यासत्तिर्न भवति। गत्यर्थेति किं। पच वत्सु यमोदनमेनं भोक्ष्यते। अत्र लृडन्तं निहतं। लोटा किं। आगच्छेद्देवग्रामं

© Dharmartha Trust J&K. Digitized by eGangotri

स्व·रा·शे· एनं द्रक्ष्यति। लृट् किं। आगच्छ त्वं ग्रामं एनं पश्यसि। वर्त्तमानसामीप्ये लट्। न चेत्कारकं सर्वान्यत् किं। आगच्छ देवदत्त ग्रामं पिता ते ओदनं भोक्ष्यते। सर्व
१० ग्रहणं किं। लोड्वाच्यकारकापेक्षया न्यूनं चेत्कारकं किंचिद्भवति। तत्राप्ययं निघातप्रतिषेधो यथा स्यादिति। आगच्छ देवदत्त ग्रामं त्वं चाहं च
द्रक्ष्याव एनं। लोट् च। गत्यर्थलोटा युक्ते लोडन्तं नानुदात्तं स्यात्। लोडन्तयोर्वाच्यं कारकं सर्वं चेदन्यन्न भवति। आगच्छ देवदत्त ग्रामं मम एनं पश्य।
10 आगच्छ देवदत्त ग्रामं माणवकं शाधि। आगम्यतां देवदत्तेन ग्रामो देवदत्तेन दृश्यतामयं। सर्वग्रहणादिहापि। आगच्छ त्वं ग्रामं सत्त्वं च पश्य
तमेनं। गत्यर्थानां किं। पचत्वमोदनं मेनं भुंक्ष्व। लोटः किं। आगच्छेस्त्वं ग्रामं मम एनं पश्य। न चेत्कारकं सर्वान्यत् किं। आगच्छ देवदत्त ग्रामं पञ्चदेवा एनं
पश्यतु। विभाषितं सोपसर्गमनुत्तमं। गत्यर्थलोटा युक्ते लोडन्तं सोपसर्गमुत्तमभिन्नं विभाषा नानुदात्तं स्यात्। न चेत्कारकं सर्वान्यत्। आगच्छ
त्वं ग्रामं एनं प्रशाधि। आगच्छ त्वं ग्रामं माणवकं प्रशाधि। आगच्छ त्वं ग्रामं त्वं वत्स च प्रविशेमनेनां पक्षे निहतं पक्षे तोदात्तं। सोपसर्गं किं। आगच्छ
देवदत्त ग्रामं मम एनं पश्य। अनुत्तमं किं। आगच्छानि देवदत्त ग्रामं एनं प्रपश्यानि। उभयत्र पूर्वेण यानि त्वं निघातनिषेधः। अन्यान्यप्युदाहरणानि
पूर्ववद्योजनीयानि। हन्त च। हन्तेत्यनेन युक्तं सोपसर्गमनुत्तमं लोडन्तं वा नानिहन्यते। हन्त प्रविश। पक्षे निहतं पक्षे शान्तत्वाद्दन्तोदात्तं। सोपसर्गं
किं। हन्त कुरु। अनुत्तमं किं। हन्त प्रभुनजावहै। भुजोऽनवने इत्यात्मनेपदं। अत्र आडुत्तमस्येत्याट्। उभयत्र निपातैर्यद्यदिहन्तेति नित्यं निघातनि
षेधः। प्राप्तविभाषेयं। यद्धितुपरं छन्दसि। यद्धितुपाद्ध्वाः परं यस्मात्तत्तिङन्तं छन्दसि नानुदात्तं स्यात्। गवां गोत्रमुदसृजो यदंगिरः। तुह्य देःस्त
उत्तमिः सिषक्त। इन्द्र वो वामुसांतिहि। अद्या द्विवर्शकान्तो न दिको तःसंप्रसारणं यत्त्वादित्वात्। आख्यामि तु ते। निपातैरित्यादिभिः सिद्धे नि
यमार्थं सूत्रं। पूरम्बूते योगे चान्निषेधस्तदा एभिरेव नान्यैरिति तेनेह न निघातनिषेधः। जोषे तिस्रा तः जायस्वोरोहावेति। अत्र एहीत्यनेन राम
परेण गत्यर्थलोटा योगे पि रोहावेत्यस्य निघातो भवत्येव। अस्मिन्नेरुह गत्यर्थत्वस्य नाष्ठेस्त्वपि तत्त्वाज्जोहावेत्यनेन गत्यर्थलोटा युक्ते

© Dharmartha Trust J&K. Digitized by eGangotri

स्यएहीत्यस्य निघातनिषेधः आप्नोति विभाषितं सोपसर्गमिति न भवति। चनचिदिवगोत्रादितद्धिताम्रेडितेष्वगतेः। एषु परेषु अगतेरुत्तरं तिङन्तं नानुदात्तं स्यात्।
चन। अयं पचति चन। चित्। अयं पचति चित्। इव। अयं पचतीव। गोत्रादि। अयं पचति गोत्रं। अयं पचति ब्रुवं। तद्धित। अयं पचति कल्पं। अनुदात्त एव
तद्धितो ग्राह्यः। अन्यत्र तद्धितस्वरेण तिङन्तस्वरो बाध्यते। अयं पचति देश्यः। आम्रेडित। अयं पचति पचति। कुत्सनाभीक्ष्ण्ययोरेव गोत्रादीनि पठ्यंते।
अन्यत्र गोत्रादीन्येव न भवति। तेन सुखिं करोति गोत्रं। अत्र भवत्येव निघातः। गोत्रं कुलं। अगतेः किं। अयं प्रपचति चन। अत्र भाष्यकाशिके। अत्रग-
तिग्रहणे न उपसर्गग्रहणं द्रष्टव्यं। शुक्लीकरोति वनोति। चादिषु च। अगतेः परं तिङन्तं नानुदात्तं स्यात् चादिषु परेषु। न च वाहाहैवयुक्ते इति सूत्रेणोद्दिष्टाश्चा-
दयोऽत्र गृह्यंते संनिकृष्टत्वान्न तु चादयोऽसत्त्वे इति सूत्रनिर्दिष्टा विप्रकृष्टत्वात्। अयं पचति च खादति च। अयं पचति वा खादति वा। उभयत्र खादतीत्यस्य
निघातप्रसंग एव नास्ति। नानावाक्यत्वात्। चवायोगे हि समुच्चये विकल्पे वा सति भवति स चानेकस्य धर्म इति कृत्वोदाहृतं। अयं पचति ह। अयं पच-
त्यह। अयं पचत्येव। अगतेः किं। अयं प्रपचति च प्रखादति च। आद्यस्य तिङन्तस्योत्तरसूत्रेण निघातो निषिध्यत एव द्वितीयं तु निहन्यते। चवायोगे प्र-
थमा। आभ्यां योगे प्रथमा तिङ्विभक्तिर्न निहन्यते। गाश्च कालयति वीणां च वादयति। गा वा कालयति वीणां वा वादयति। कजविक्षेपा तुरा
द्वितीया। योगग्रहणं पूर्वाभ्यामपि योगे निघातप्रतिषेधार्थं। चादिषु चेति च च वा वोरित्युच्यमाने इहैव स्यात्। गाश्च कालयति च वीणां वादयति च। अ-
न तु पूर्वत्र। पूर्वसूत्रे चानुकृष्टत्वादिहागतेरिति नानुवर्त्तते। तेनेहापि भवति। अयं प्रपचति च प्रखादति चेति वृत्तिकृत्। पूर्वसूत्रे चकारेण न पठ्यते
इहागतेरित्यनुवर्त्तत इति चनचिदिवेति सूत्रे कैयटः। तथावर्गयोर्विरोधस्तु रूपभेदश्चायतीति चिंत्यं। उदाहरणेषु आद्यं आद्यतिङंतमनिहतं।
उत्तरमुत्तरं निहतं। हेति क्षियायां। धर्मोऽज्वं धनं क्षिया। तस्यां गम्यायां हशब्दयुक्तं प्रथमं तिङन्तं नानुदात्तं स्यात्। स्वयं ह रथेन याति ३ उपाध्यायं प-
दातिं गमयति। स्वयं ह ओदनं भुंक्ते ३ उपाध्यायं सक्तून्पाययति। प्रथमं तिङन्तं न निहन्यते द्वितीयं तु निहन्यत एवेति। क्षियाशीःप्रैषेषु तिङ्ष्टुतः॥

© Dharmartha Trust J&K. Digitized by eGangotri

स्व·रा·शो· अहेति विनियोगे च। अहशब्देन युक्तं प्रथमं तिङन्तं नानुदात्तं स्याद्विनियोगे क्षिप्रायां च। अनेकस्मिन्प्रयोजने प्रेषणं विनियोगः। त्वमहग्रामं गच्छ त्व
११ महारण्यं गच्छ। क्षिप्रायां। स्वयमह रथेन याति उपगुरूपदातिं गमयति। एवं च निघातप्रतिषेधः कृतस्य। वाहलोप एवेत्यवधारणं। चलोपे अहलो
पे च प्रथमं तिङन्तं नानुदात्तं स्यादवधारणेर्थे एवशब्दप्रयोगे सति। सूत्रेण वाहलोपस्याविधानादर्थप्रकरणादिना गम्यमानार्थत्वादप्रयो
ग एव लोपो विवक्षितः। चशब्दः समुच्चयार्थः। अहशब्दः केवलार्थः। समानकर्तृके चलोपः। नानाकर्तृकेऽहलोपः। चलोपे। अयमेवारण्यं गच्छ
तु अयमेव ग्रामं गच्छतु। ग्राममेवारण्यं वा गच्छत्वित्यर्थः। अहलोपे। स एव ग्रामं गच्छतु अयमेवारण्यं गच्छतु। केवलं ग्रामं केवलमरण्यमित्य
र्थः। आद्यमनिहतं द्वितीयं निहतं। अवधारणे किं। देवदत्त क्व भोक्ष्यसे क्व वा धोक्ष्यसे। भोक्ष्यसे वा धोक्ष्यसे वेत्यसिच लोपः। असंभावनायामेव
शब्दः। न क्व विज्ञोप्स्यसे न क्व विद् धोक्ष्यसे चेत्यर्थः। एवे चानियोगे इति पररूपं। वाहि लोपे विभाषा। चवाहाहैवा स्वाद्यस्तेषां लोपे प्रथमं तिङन्तं वा
नुदात्तं न स्यात्। आसुक्ता व्रीहयो भवन्ति श्वेता गा आज्याय दुहन्ति। अवधारणार्थे एवशब्दप्रयोगे समानकर्तृके चलोप इति नियमो न तु सर्वत्र
तस्य च चलोपः। वा लोपे। व्रीहिभिर्यजेत यवैर्यजेत। भवन्ति यजेतेति पक्षे निहतं पक्षे आद्युदात्तं द्वितीयं तु निहतमेवाप्येवं यथादर्शनमुदाह
रणं। वै वावेति च छन्दसि। वैशब्देन वावशब्देन च युक्तं प्रथमं तिङन्तं अनुदात्तं वा न स्यात् छन्दसि। वे स्फुटार्थे क्षमायां च। वावशब्दः सिद्धौ स्फुटार्थे च।
अह वै देवानामासीत् रात्रिर्वा असुराणामासीत्। अयं वाव हस्त आसीत्। इत्यादि। एकान्याभ्यां समर्थाभ्यां। समानार्थाभ्यामाभ्यां युक्तं प्रथमं ति
ङन्तं अनुदात्तं वा न स्याच्छन्दसि। प्रजामेकां जिन्वति ऊर्जमेकां रक्षति। जिवि प्रीणनार्थः। इदित्वान्नुम् लट् तिप् शप्। तयोरन्यः पिप्पलं स्वा
द्वत्त्यनश्नन्नन्यो अभिचाकशीति। सोत्राकशीर्येति तु क्विवाकशीतिरूपं द्वितीयं त्वनिहतं। समर्थाभ्यां किं। एको देवानुपातिष्ठत्। अत्रैकश राम
ब्दः संख्यावाची नान्यार्थः। एकशब्दस्यानेकार्थत्वात्समर्थग्रहणं। अत्र प्रकरणे साद्वयं न व्यवस्थाहेतुरिति निपातैर्यद्यदीत्यत्र ज्ञापितं।

×कोशिनाममनार्थात् २

११

© Dharmartha Trust J&K. Digitized by eGangotri

यद्वृत्तान्नित्यं। यच्छब्द वदितं रूपं सर्वमिह यद्वृत्तशब्देन गृह्यते तेन तु उत्तरउत्तमविभक्त्यंतमित्येवायमिष्टः। यद्वृत्तात्परं तिङंतं नित्यमनुदात्तं न स्यात्। यो यजा
ति यजाते इत्। यद्याजः पचते। यतरः करोति। यादायनिः पचति। पूजनात्पूजितमिति सूत्रे पूजनादित्येव पूजितपरिग्रहे सिद्धे पूजितग्रहणं अंतर
प्रतिपत्त्यर्थं क्रियमाणं ज्ञापयति इह प्रकरणे पंचमीनिर्देशे पानंतर्येनाश्रीयत इति व्यवहितेपीदं प्रवर्त्तते। यत्ता विश्वानि विष्णुपे। यत्त आतिथ्य
मानुषग्जोषत। सुरुग्ना नो लिटि धासः से अपस्तधेयामित्यभ्यासस्य संप्रसारणं। जुषी प्रीतिसेवनयोस्तुदादेर्लेट् व्यत्ययेनातिः शः तस्य लोप
इतीकारलोपः। बहुलवचनान्निवभावे व्यत्ययेन शपः श्लुः गुणश्च। अनुदात्ते वेत्यासुदात्तत्वं। यथेच्छं प्रवृत्तौ वेति वाच्यं। पत्र कवनयज्ञतेपद्धे
निहतं आद्युदात्तं च। सगतिरपि तिङ्। पूजनार्थेभ्यः काष्ठादिभ्यः परं पूजितं सगतिकमगतिकं च तिङंतमनुदात्तं स्यात्। नलुडित्यादि निषेधस्यापवा
दः। यत्काष्ठं पचति। यत्काष्ठं प्रपचति। सगतिरिति तुल्ययोगे सहशब्दस्ते नगतेरपि निघातो भवति। तिङ्ग्रहणं पूजनात्पूजितमिति सूत्रस्य तिङ्
विषयत्वज्ञापनार्थं। अत्र भाष्यकाशिके। अत्र गतिग्रहणेनोपसर्गग्रहणमिष्यते। इह न भवति। यत्काष्ठं शुक्लीकरोति। एवं च काष्ठायाः परः करोति
र्नास्तीति निपातैर्यद्यदीति निघातप्रतिषेध एवात्र भवति। काष्ठ। दारुण। अमातापुत्र। वेश। वेशशब्दः सुभगार्थः। अनाज्ञात। अपुत्र। अयुत
अद्भुत। भृश। परम। सुख। घोर। कल्याण। कुत्सने च सुप्यगोत्रादौ। पदादिति निवृत्तं कुत्सनार्थे गोत्रादिवर्जिते सुबंते परे सगतिरगति
च तिङंतमनुदात्तं स्यात्। पचति पूति। प्रपचति पूति। पचति मिथ्या। प्रपचति मिथ्या। कुत्सने किं। प्रपचति पचति वा शोभनं। अयं विधिः परत्वा
न्नतिषेधं बाधते। यत्पचतः प्रपचतो वा पूति। क्रियाविशेषणत्वान्नपुंसकत्वं। अगोत्रादौ किं। पचति प्रपचति वा गोत्रं। क्रियाकुत्सने इति वा
च्यं। कर्तुः कुत्सने मा भूत्। प्रपचति पचति वा पूतिर्देवदत्तः। पूतिश्चानुबंधो भवतीति वाच्यं। तेनायमंतोदात्तः वसेस्तिः प्रबाहुलकात् स्मोपिहृ
ते आद्युदात्तः पूतिशब्द इति हरदत्तः। तत्र पूत्र अस्थाने पूयी विशरणे दुर्गंधे च अस्मान्निपूति वक्तुमुचितं। बहुवचनांतं तिङंतं वानुदात्तमिति वाच्यं।

© Dharmartha Trust J&K. Digitized by eGangotri

प्रपचंतिप्र॰ति। पचंतिप्र॰ति। यद्वा तिङ् तस्य निघातस्तदा प्रतिरंतोदात्तः। अन्यदा त्वाद्युदात्तः। सुपीति विस्पष्टार्थं पचति किमाती त्यत्र समानवाक्यत्वाभावान्नाप्रतिः।
१२ आमंत्रितं पूर्वमविद्यमानवत्। अनुदात्तं सर्वमपादादाविति सर्वं निवृत्तं आमंत्रितं पूर्वमविद्यमानवत्स्यात्। देवदत्त पचसी त्यत्र तिङ्ङतिङ इति निघातो न
भवति। यावद्देवदत्त पचसी त्यत्र यावद्यथाभ्यामिति निघातप्रतिषेधस्य [redacted] निषेधो भवति। देवदत्त जातु पचसी त्यत्र जात्वपूर्वं निघातनिषे
12 धः सिध्यति। आहो देवदत्त पचसि अत्राहो उताहो वानंतरमिति निघातप्रतिषेधो भवति। अपादादावित्यस्य निवृत्तत्वादग्ने नय सुपथा राये अस्मा
न् अग्ने यासि सुरभिस्त्रिभिः इंद्र पिब तुभ्यं सुतो मदाय वायो याहि शिवा दिवः इत्यादिष्वपि अग्ने इत्यादीनां पादादीनामप्यामंत्रितानामविद्यमान
त्वान्नयेत्यादीनां न निघातः। अग्न इंद्र वरुण मित्र देवाः अग्ने इत्यस्याविद्यमानत्वादिंद्रेत्यादीनामाष्टमिकनिघाताभावेषाष्ठिकमामंत्रिताद्युदा
त्तत्वमेव भवति। देवास्मान्पाहि नृहरे विलोस्मान्क्लुसर्वदा। अस्मानित्यस्य नस्भावो न। इंद्र त्वा वृषभं वयं। युष्मो नो अद्य सुहवा युष्मे। अत्र
चान्सो छांदसत्वाद्भवतः। आमंत्रितं किं। अयं पचति। पूर्वं किं। देव करोषि। आमंत्रिताद्युदात्तत्वे कर्तव्ये तस्याविद्यमानतामा भूत्। तस्यैतत्
रस्तत्रस्योदाहरणं विषयो भविष्यति। कृते तु पूर्वग्रहणे तस्य संबंधिशब्दत्वाद्यदपेक्षं पूर्वत्वं तस्य परस्य स्वनिमित्तेऽन्यनिमित्ते वा कार्ये कर्त
व्ये तस्याविद्यमानता न तु स्वकार्ये इति न दोषः। इहं मे गंगे यमुने इत्यत्र गंगे पूर्वमामंत्रितं। ततः परस्य यमुने शब्दस्य निघाते कर्तव्ये
स्वयमविद्यमानत्वान्ननिमित्तं भवति तथापि मे शब्दस्य निमित्तभावं न प्रतिबध्नाति। वदिस्य तिदेशासिध्यर्थं। अन्यथा अविद्यमानं पूर्वं
न प्रयोक्तव्यं किंतु परं प्रयोक्तव्यमित्यर्थः स्यात्। अत्र केयट हरदत्तौ। यद्य यमर्थोभिमतः स्यात्तर्हि राजदंतादिषु आमंत्रितं चेति पठितं
स्यात् इति तन्न। तस्य प्रकरणस्य समासविषयत्वात्कायस्य पूर्वविप्रश्या अर्ध इत्यादिष्वेकदेशिसमासे कृते पूर्वदीनां पूर्वनिपाते प्राप्ते प राम
रनिपातार्थमामंत्रितं चेति वचनं स्यात्। वाक्येपि परनिपातार्थं सूत्रमिदं स्यादिति वक्तरणं कर्तव्यं। नामंत्रिते समानाधिकरणे॥ श्री॥

© Dharmartha Trust J&K. Digitized by eGangotri

अन्यतरस्यां सामान्यवचनं संबंधनीयमिति भाष्यं। समानाधिकरणे आमंत्रिते परे विशेष्यं पूर्वमामंत्रितमविद्यमानवन्न स्यात्। अग्ने तेजस्विन्न
स्तिसः। अग्नेशब्दस्याविद्यमानत्वात्तेजस्विन्निति पदस्यास्त्येव निघातः। हरे दयालो नः पाहि। अत्र नस्। आमंत्रिते किं। देव करोषि। एवं
तं तु व्यधिकरणे स्यात्। देवदत्त रोति सः। समानाधिकरणे किं। पाणिनि मते अग्न इन्द्र वरुण इत्यादौ व्यधिकरणनिवृत्यर्थं। भाष्यकृन्मते
विस्पष्टार्थं। सामान्यवचनस्य विशेषवचनापेक्षत्वात्तत्र सामानाधिकरण्यस्यावश्यं स्थितत्वात्। सामान्यवचनं किं। अग्ने देवि सर
स्वति इंद्रेकाव्ये विहव्ये एतानि ते अघ्न्ये नामानि। सामान्यवचनं विभाषितं विशेषवचने। अत्र भाष्यं। बहुवचनमिति वक्तव्यामीति।
विशेषणे आमंत्रिते परे बहुवचनांतमामंत्रितं विशेष्यं अविद्यमानवद्वा स्यात्। देवाः शरण्या अस्तिसः। शरण्याः अस्तिशब्दयोर्वै
२७ कल्पिको निघातः। सामान्यवचनविशेषवचनशब्दयोरेकं व्यर्थं। द्वयोः संबंधिशब्दत्वादन्यतरेणेतरस्याक्षेपात्। अन्यतरदपि किमर्थं
हे देवाः मनुष्याः अस्तिसः। अत्र विकल्पो मा भूत्। बहुवचनमिति एवं निषेधस्यास्याविकल्पस्य च विषयविभागार्थं। एते तिङ् तिङ
त्यादयो निघातानिघातप्रतिषेधाश्च पदकाले विच्छिद्य पाठे पि भवंति। अत्र संहिताधिकाराभावात्॥ इति तिङंतस्वराः॥ ✕ ॥
अथ प्रातिपदिकस्वराः॥ ॐ॥ फिषोंत उदात्तः। प्रातिपदिकस्यांत उदात्तः स्यात्। फिडिति पूर्वाचार्यप्रसिध्या प्रातिपदिकमुच्यते॥
उच्चैः। हृदः। ननु उच्चैरिति उदात्तः। एक त्रिश्वि हल् तर्षिभ्यः कि दिति डे सि सप्रत्यययोः प्रत्ययस्वरेणैवांतोदात्तं सिद्धं। ये चापि न व्युत्पाद्यंते
नडादयस्तत्रापि सर्वनाम धातुजमिति मते प्रकृतिप्रत्ययभागस्यावश्यकल्पनीयत्वात् तस्याधत्र न विषयस्यानिसंतस्य। शक
टिशकघोरहरमहरंपर्याये एतासु अपवादविषयाभावस्तत्र प्रत्ययस्वरेणैवांतोदात्तत्वे सिद्धे इदं सूत्रं किमर्थमिति चेत्। उच्यते। अ
व्युत्पत्ति पक्षे आवश्यकत्वात्। किं च सर्वनाम धातुजमिति यदा नास्ति तदापि कर्तव्यं। किं च आत्मनः पुत्रमिच्छति पुत्रीयपुत्रकाम्यश

© Dharmartha Trust J&K. Digitized by eGangotri

स्व॰ रा॰ शे॰ ह्वयोर्धातुस्वरेणांतोदात्तयोः क्विपल्लोपयलोपयोः कृतयोः पुत्रीः पुत्रियौ पुत्रकाम्य पुत्रकामो इत्यादावंतोदात्तत्वसिध्यर्थमिदं सूत्रं । अन्यथा सर्वानु
१३ दात्तत्वं स्यात् । पाटलापालंकांबासागरार्थानां । एतदर्थानां मंतउदात्तः स्यात् । पाटला । फलेरुहा । सुरूपा । पाकला । एते पर्यायाः । लघावंते इति
प्राप्ते । अपालंकः । व्याधिघातः । आरेवतः । आरग्वधः । एते पर्यायाः । अत्रोनर्वनं तामित्याद्युदात्तत्वे प्राप्ते । सागरः । समुद्रः । उदधिः । गेहार्थानां
13 मस्त्रियां । गेहार्थानां शब्दानां मंतउदात्तः स्यात् स्त्रियां न । गेहं । हर्म्यं । नब्विषयस्येति प्राप्ते । अस्त्रियां किं । शाला । आद्युदात्तोयं । इहैव पर्युदासा
त् ज्ञापकात् । गुदस्य च । गुदशब्दस्यांतउदात्तः स्यात् स्त्रियां न । अंगेहार्थमिदं । गुदं । अस्त्रियां किं । आंत्रेभ्यस्ते गुदाभ्यः । ध्यपूर्वस्य स्त्रीविषय
स्य । नित्यस्त्रीलिंगस्य धकारयकारपूर्वो यो यो आकारः सउदात्तः स्यात् । अंतर्द्धा । लघावंते इति मध्योदात्तत्वे प्राप्ते । छाया । माया । जाया । यांतस्यांत्यात्
पूर्वमिति प्राप्ते । स्त्री इति किं । बाह्यं । यगंतं वा दाद्युदात्तं । विषयग्रहणं किं । इभ्या । क्षत्रिया । यतो नाव इत्याद्युदात्त इभ्या शब्दः । क्षत्रियशब्दस्त्र
यांतस्यांत्यात्पूर्वमिति मध्योदात्तः । खांतस्याश्मादेः । शकारमकारादिभिन्नस्य खशब्दांतस्यांतउदात्तः स्यात् । नखं । स्वांगशिटामदंता
नामिति प्राप्ते उखा । नाम भांडविशेषः । खयुवर्णं कृत्रिमाख्या चेदिति प्राप्ते । सुखं दुःखं । नब्विषयस्येति प्राप्ते । अश्मादेः किं । शिखा । यंतरं
गत्वाद्युपः प्रागेव स्वांगः शिटामित्याद्युदात्तत्वे । यद्येवं मा वायां बध्नो अपि कृद्दस्तत्रापि आद्युदात्तत्वं स्यात् । तस्मादत्र शाद्धि पर्युदासाद्
युदात्तमिति तत्त्वं । एवमांत्रेभ्यस्ते गुदाभ्य इत्यत्रापि स्त्री पर्युदासात् । मुखं । स्वांगशिटामिति नब्विषयस्येति वाद्युदात्तं । हिष्ठवत्सरति
शत्यांतानां । हिष्ठ । वत्सर । ति । शत् । था । एवमंतानां मंतउदात्तः स्यात् । अतिशयेन बहुलो बंहिष्ठः । नित्यादाद्युदात्तत्वे प्राप्ते । वहिष्ठैरश्वैः
सुवृता । यद्वहिष्ठं नातिविधे इत्यादौ व्यत्ययेनाद्युदात्तत्वं । परिवत्सरः । अव्ययपूर्वपदप्रकृतिस्वरे प्राप्ते । संवत्सरे तु संपूर्वाच्चिदिति राम
सप्तजत्यस्य चित्त्वादपि सिद्धं । सप्ततिः । अशीतिः । नवतिः । त्रिंशत् । चत्वारिंशत् । पंचाशत् । लघावंते इति प्राप्ते । थ्यथः । त्रपः । ष्टपः । अवष्टपः ।

© Dharmartha Trust J&K. Digitized by eGangotri

निशापः। दक्षिणस्य साधौ। दक्षिणशब्दस्यांतउदात्तः स्यात् प्रावीण्येर्थे। वीर्याणि सामसु वा दक्षिणः। प्रवीण इत्यर्थः। साधुवाचित्वाभावे तु व्यवस्थायां
सर्वनामत्वात् स्वांगशिटामित्याद्युदात्तः। अर्थांतरे तु यथावं तद् इति पूर्वदात्तः। स्वांगाख्यायामादिर्वा। स्वांगाख्यायां दक्षिणशब्दस्याद्यंतौ प
र्यायेणोदात्तौ स्यातां। दक्षिणः पाणिः। स्वांगाख्यायां किं। दक्षिणो देशः। आख्याग्रहणं किं। प्रत्यङ्मुखस्य मासीनस्य दक्षिणमङ्गमुत्तरं न वल्लुत्तरं दक्षि
णं। छंदसि च। दक्षिणस्यांतादी पर्यायेणोदात्तौ स्यातां वेदे। अस्वांगार्थमिदं। दक्षिणः। कृष्णस्य मृगाख्या चेत्। कृष्णशब्दस्यांतउदात्तः स्यात् छं
दसि। न तु मृगाख्यायां। कृष्णो नो नाव। वर्णानां तरेणत्याद्युदात्तापवादः। मृगाख्यायां तु कृष्णो रात्र्यै। आख्याग्रहणं किं। कृष्णो मृगः। वा ना
मधेयस्य। नामधेयस्य कृष्णस्यांतउदात्तो वा स्यात्। कृष्णो नामायं। पक्षे आद्युदात्तः साम ध्वाति। शुक्लगौरयोरादिः। नामधेययोः शुक्लगौ
रशब्दयोरादिरुदात्तो वा स्यात्। शुक्लः। गौरः। सरो गौरो यथा पिब। अनामधेययोरंतोदात्तत्वमेव। अंगुष्ठोदकबकवशानां छंदसि।
एषां छंदस्यंतउदात्तः स्यात्। अंगुष्ठः। स्वांगानामकुर्वादीनामिति द्वितीयस्योदात्तत्वे प्राप्ते। उदकं। कर्दमादित्वं। तेनाद्यद्वितीययोः पर्याये
ण प्राप्ते। बकः। प्राणिनां कुपूर्वाणामित्याद्युदात्तत्वे प्राप्ते। वशा। वशा गणानि यमार्थी छंदस्येवायमंतोदात्तो। भाषायामाद्युदात्तस्त्वा कृ
पृष्ठस्य च। पृष्ठस्येति पाठांतरं। पृष्ठस्यांतउदात्तः स्यात् छंदसि। स्वांगशिटामिति प्राप्ते। पृष्ठं। वा भाषायां। पृष्ठस्यांतउदात्तो वा स्या[illegible]सि।
पृष्ठं। पक्षे स्वांगशिटामित्याद्युदात्तं। अर्जुनस्य तृणाख्या चेत्। अर्जुनशब्दस्य तृणाख्यायामंतउदात्तः स्यात्। अर्जुनं। तृणे इति किं। अर्जुनो वृ
क्षः। उनर्वन्नंतानामित्याद्युदात्तः। अर्यस्य स्वाम्याख्या चेत्। स्वाम्याख्यायामर्यशब्दस्यांतउदात्तः स्यात्। अर्यः। यांतस्यांत्यात्पूर्वमिति
यतो नाव इति वाद्युदात्तत्वे प्राप्ते। वैश्ये तु अर्यः। आशाया अदिगाख्या चेत्। अदिगाख्यायां आशाशब्दस्यांतउदात्तः स्यात्। आशा॥
दिगाख्यायां पाठमत एव निषेधात् ह्यापकाद्युदात्तता। इंद्र आशाभ्यस्परि। नक्षत्राणामाब्विषयाणां। नित्यावंतानां नक्षत्रवाचिनामंतउदा
त्तः स्यात्।

© Dharmartha Trust J&K. Digitized by eGangotri

स्व॰ग॰शे॰ ज्येष्ठा। श्रविष्ठा। धनिष्ठा। इष्ठन्नन्तत्वादाद्युदात्तत्वे प्राप्ते। आर्द्रा। चित्रा। अश्लेषा। अनुराधा। नवावन्त इति प्राप्ते। नक्षत्राणां किं। तारका। आब्विषयाणां किं। अ
१४ श्विनी। न कुपूर्वस्य कृत्तिकाख्या चेत्। कवर्गपूर्वः य आप् तद्विषयस्य नक्षत्रस्यान्त उदात्तो न स्यात्। कृत्तिकाख्यायां। कृत्तिका। आर्यिका। बहुलिका।
कुपूर्वस्य किं। बहुला। कृत्तिकाख्यायां किं। मघा। आख्यायां किं। कृत्तिकासु जाता माणविका कृत्तिका। नक्षत्रेभ्यो बहुलमिति जातार्थस्य न
14 क्षत्राणो लुक्। घृतादीनां च। घृतादीनाम् अन्त उदात्तः स्यात्। घृतं मिमिक्षे। घृतं रजतं श्वेतं सप्त अष्ट जानरूप। घृतादिराकृतिगणः। ज्येष्ठकनिष्ठ
योर्वयसि। ज्येष्ठकनिष्ठयोरन्त उदात्तः स्याद्वयसि अभिधेये। ज्येष्ठ आह चमसा। कनिष्ठ आह चतुरः। वयसि किं। ज्येष्ठः श्रेष्ठ[illegible]। क
निष्ठः स्थिष्ठः। इह नित्वादाद्युदात्त एव। बिल्वतिष्ययोः स्वरितो वा। अनयोरन्तः स्वरितो वा स्यात्। पक्षे उदात्तः। बिल्वः। तिष्यः॥ इति फिट्सूत्रेषु प्रथ
मः पादः॥ ॥ अथादिः प्राक् शकटेः। अधिकारोयं शकटिशकट्योरिति यावत्। ह्रस्वान्तस्य स्त्रीविषयस्य। ह्रस्वान्तस्य नित्यस्त्रीलिंगस्यादिरुदात्तः स्यात्।
तनुः। दितिः। ह्रस्वान्तस्य किं। नदी। वधूः। समित्। दृषत्। स्त्रीविषयस्य किं। मरुः। वायुः। अग्निः। विषयग्रहणं किं। लघुः। बहुः। नब्विषयस्या। निसंतस्य।
इसन्तवर्जितस्य नित्यनपुंसकस्यादिरुदात्तः स्यात्। कुण्डं। वनं। वृत्तं। येवं। नब्विषयस्य किं। मूर्त्तः। विषयस्य किं। लघु। अनिसन्तस्य किं। सर्पिः॥
हविः। बर्हिः। अर्चिस्तु बीत्यादित्वात्। इसिः। इसिन्नन्तस्याद्युदात्तत्वं भवत्येव। पुतेरिसिन्प्रादेश्च जः इति इसिन्। ज्योतिर्विश्वं स्वर्दृशे। तृणधान्यानां
च द्व्यषां। तृणवाचिनां धान्यवाचिनां च द्व्यचामादिरुदात्तः स्यात्। काशाः। कुशाः। माषाः। तिलाः। तिलो माषाष्टो घृतादित्वादन्तोदात्तौ इति संप्रदायस्य
कदाचित्सूत्रे कैयटः। तच्चिन्त्यं। तिलाश्च मे इत्याद्युदात्तस्यैव पठ्यमानत्वात्। उ माशब्दस्य मकरवत्त्वेऽसनेन विशिष्यपर्यायेणोदात्तविधानात्।
तृणधान्यानां किं। आम्रः। द्व्यषां किं। गोधूमाः। न घावतर इति मध्योदात्तः। न्नः संख्यायाः। नकाररेफान्तायाः संख्याया आदिरुदात्तः स्यात्। पंच। राम
नव। दश। सप्त अष्ट शब्दो घृतादित्वादन्तोदात्तौ। चतुष्कपालेषु संस्कृतः चतुष्कपालः। इगन्तकालेति पूर्वपदप्रकृतिस्वरेणाद्युदात्तः। न्नः किं।

© Dharmartha Trust J&K. Digitized by eGangotri

गणः। संख्यायाः किं। अंतः। प्रांतः। स्वांगं शिटामदंतानां। स्वांगवाचिनां सर्वनाम्नां चादंतानामादिरुदात्तः स्यात्। शिटिति सर्वनाम। कर्णाभ्यां चुबुका
द्धि चु ग्रामविवम धास्ते। विश्वो विहायाः परो मात्रया परः सो अस्तु इत्यादौ व्यत्ययेनांतोदात्तत्वं। स्वांगशिटां किं। घटः। अदंतानां किं। बाहू राजन्यः
कृतः। अहं। तपरकरणं किं। ग्रीवायां बद्धो अपि कक्ष आसनि। प्राणिनां कुपूर्वाणां। प्राणिवाचिनां कवर्गात्पूर्वे यवर्णस्तेषामादिरुदात्तः स्यात्।
पूर्वाणामिति सौत्रो निर्देशः। काकः। वृकः। बकः। कोकः। शुकः। प्राणिनां किं। उदकं। कर्दमादिरयं। कुपूर्वाणां किं। वराहः। लघावंते द्युतिमध्योदात्तः
खय्युवर्णं कृत्रिमाख्या चेत्। खयि परे उवर्णमुदात्तं स्यात्। कंदुकः। अकृत्रिमाख्यायां किं। बंधूकः। उनर्वन्नंतानां। एतदंतानामादिरुदात्तः स्यात्
उन। अर्जुनः। वरुणं वो रिशादसं। पिशुनः। ऋ। भ्राता। प्रायिकमेतत्। पितामाता भ्रातरएनमाहुः। वन्। पीवानं मेषं। वर्णानां तणनितितंता
नां। एतदंतानां वर्णवाचिनामादिरुदात्तः स्यात्। त। एतः। श्वेतशब्दो वृतादिः। लोहितः। रोहितः। हरितः। ण। हरिणः। शोणः। नि। पृश्निः। ति। शितिः।
त। पृषत्। हरित्। ह्रस्वांतस्य ह्रस्वमनृत्ताच्छील्ये। ह्रस्वांतस्यादिभूतं ऋकाराभिन्नं ह्रस्वमुदात्तं स्यात्ताच्छील्ये। चपलः। निपुणः। कुशलः। मुनिः।
ह्रस्वांतस्य किं। दघुगमी। ह्रस्वं किं। प्राज्ञः। अनृत् किं। नृशंसः। कृपणः। कृशः। ताच्छील्ये किं। जडः। बधिरः। अक्षस्यादेवनस्य। अदेवनस्याक्षशब्द
स्यादिरुदात्तः स्यात्। तस्य नाक्षस्तप्यते। देवने तु अक्षैर्मा दीव्यः। अर्धस्यासमद्योतने। असमद्योतनेर्धशब्दस्यादिरुदात्तः स्यात्। अर्धो ग्रामस्य।
समशके तु अर्धं पिप्पल्याः। पीतद्वर्थानां। पीतद्वर्थानामादिरुदात्तः स्यात्। पीतद्रुः। सरलः। ग्रामादीनां च। एषामादिरुदात्तः स्यात्। ग्रामः। सो
मः। यामः। पुरुषः। स्थूरः। हृदः। आकृतिगणोयं। स्फिगंतस्योपम्यस्य नामधेयस्य। स्फिगिति लुपः प्राचां संज्ञा। लुबंतस्योपमेयवाचिन आ
दिरुदात्तः स्यात्। संज्ञायामुपमानमित्यस्यार्थः। चिंचा इवायं पिशाचः। लुम्पनुष्ये इति कनो लुप्। स्फिगंतस्य किं। अग्निर्माणवकः।
गोवाहीकः। उपमानस्य किं। वरणः। नामधेयस्य किं। कुक्कुट इवायं मयूरः। न व्याघ्रमाहिषसिंहद्रुपर्वतानां। एषां पूर्वेण प्राप्तमाद्युदा

© Dharmartha Trust J&K. Digitized by eGangotri

स्व·रा·शे· अत्वंनस्यात्। व्याघ्रश्चायंव्याघ्रः। महिषः। सिंहः। वृक्षपर्वतयोर्विशेषाणामेवग्रहणमिष्यते। तेन स्वरूपग्रहणंनभवति। तालश्चायंतालः। मेरुरि
वायंमेरुः। वृक्षश्चायंवृक्षः। पर्वतः। अत्रपूर्वेणाद्युदात्तत्वंभवत्येव। राजशब्दस्यमन्वाचेत। यमन्वाकृता वृद्धिः। तस्माज्जभ्यावृद्धस्यलुवतस्योपमे
15 यवाचिनआदिरुदात्तःस्यात्। पूर्वेणैवसिद्धेराजशब्दस्यवेत्यनुवृत्ताद्विवृद्धेरेवेतिनियमार्थमिदं। आंगश्चायमांगः। यमन्वाकिं। अंगश्चायमंगः।
रामश्चरामः। मांतेष्वेवमांसता। लघावंतेद्वयोश्चबह्वषोर्गुरुः। अंतेलघोर्द्वयोश्चलघ्वोरंतयोः सतोर्बह्वचस्यगुरुरुदात्तःस्यात्। कल्याणः।
कोलाहलः। लघावंतेद्वयोश्चेतिकिं। वातप्रमीः। सभासंजननं। कपाली। बह्वचःकिं। देवः। गुरुःकिं। किसलयं। स्त्रीविषयवर्णनाम्नामक्षुपूर्वा
णां। एषांत्रयाणामादिरुदात्तःस्यात्। स्त्रीविषय। लल्लना। वर्णनाम्ना। हरिणी। अत्रवर्णानांतणेत्येवसिद्धेत्रवर्णग्रहणंचिंत्यं। अक्षुशा
ब्दात्पूर्वोस्त्येषांते अक्षुपूर्वाः। तरक्षुः। शकुनीनांचलघुपूर्वं। पक्षिवाचिनांपूर्वंलघूदात्तंस्यात्। कुक्कुटः। तित्तिरिः। नयोदात्तावेतो। नर्तु
प्राण्याख्यायां। ऋतुवाचिनांप्राणिवाचिनांचयथालक्षणंप्राप्तमुदात्तंनस्यात्। हेमंतः। कृकलासः। लघावंतेद्वयोश्चेतिनिषिद्धेतोदात्तत्वं। स
तुप्राण्याख्यायांकिं। तुषारः। धान्यानांचवृद्धक्षांतानां। धान्यवाचिनांवृद्धानांक्षांतानांषांतानांचादिरुदात्तःस्यात्। नैषाहकाः। वाला
ह्वाः। धान्यानांकिं। आलोकः। वृद्धक्षांतानांकिं। गोधूमाः। वृद्धानांकिं। वणकाः। अक्षांतेकः। क्षांतानांकिं। शालयः। जनपदशब्दानामषंतानां।
जनपदवाचिनामजंतानामादिरुदात्तःस्यात्। अंगाः। वंगाः। जनपदशब्दानांकिं। आम्रः। अंगोवंगोवाराजा। अषंतानांकिं। दरदः। हयादी
नांचलांतानामसंयोगपूर्वाणामंतःपूर्वोवा। हलादीनामसंयोगपूर्वोयोलशब्दस्तदंतानांजनपदानामादिरुदात्तःस्यात्। अंतोवात
तःपूर्वोवा। पंचालाः। कोसलाः। हयादीनांकिं। मरालाः। असंयोगपूर्वाणांकिं। मल्लाः। पुल्लाः। जनपदानांकिं। पललं। लांतानांकिं। वसा एम
तयः। इगंतानांचद्व्यषां। इगंतानांजनपदानांद्व्यचांवाआदिरंतोवाउदात्तः। कुरवः। चेदयः। इगंतानांकिं। अंगाः। द्व्यचांकिं। वसातयः। जनप

© Dharmartha Trust J&K. Digitized by eGangotri

दानां किं। कृपिः। इति फिट्सूत्रेषु द्वितीयः पादः॥ अथ द्वितीयं प्रागीषात्। ईषशब्दात् प्राग्द्वितीयमित्यधिक्रियते। त्र्यचां प्राङ् मकरात्। म
करशब्दात् प्राक् त्र्यचामित्यधिक्रियते। स्वांगानामकुर्वादीनां। कवर्गरेफवकारादीनि वर्जयित्वा त्र्यचां स्वांगवाचिनां द्वितीयमुदात्तं स्यात्॥
जघनं। उदरं। जठरं। स्वांगानां किं। अर्भकः। अकुर्वादीनां किं। मुष्कः। रसना। इषणाः। वदनं। एषु स्वांगशिटामित्याद्युदात्तत्वं। रसना
स्त्रीविषयेत्याद्युदात्तात्। कपालं तु लघावन्ते द्वयोश्च बह्वषो गुरुः इति मध्योदात्तत्वान्न प्रत्युदाहृतं। मादीनां च। मरीकादीनां त्र्यचां द्वितीयमुदात्तं स्यात्।
मगधः। मक्षिका। अत्र परत्वान्मध्योदात्तत्वं। केचित्तु अयं स्त्रीविषयेति सूत्रे प्युदाह्रियते। शादीनां शाकानां। सकारादीनां शा
कवाचिनां त्र्यचां द्वितीयमुदात्तं स्यात्। सर्षपः। सादीनां किं। मूलकं। शाकानां किं। सूकरः। केचित्तु शादीनामिति पठित्वा शत
पुष्पा। शतपुष्पा इत्युदाहरन्ति। आधर्म्यश्वकं कथमिति चिन्त्यं। सर्षपशब्दस्य सादीनां शाकानामित्याद्युदात्तत्वे प्राप्ते परत्वाद् अथ द्वि
तीयं प्रागीषादित्यनुवर्त्तमाने पान्तानां गुर्वादीनामिति मध्योदात्तत्वमिति संप्रोदश्चेति सूत्रे कैयटः। एवं च कथमत्र सूत्र
पाठे पेहितं इति चिन्त्यं। पान्तानां गुर्वादीनां। पशब्दान्तानां गुर्वादीनां त्र्यचां द्वितीयमुदात्तं स्यात्। पादपः। आतपः। कच्छपः। कश्यपः।
शिंशपा। पान्तानां किं। गर्दभः। गुर्वादीनां किं। कुणपः। अनूपं। षष्ठ्यांतु नीपं। युतान्यण्यन्तानां। एतदन्तानां त्र्यचां द्वितीयमु
दात्तं स्यात्। युतं। अयुतं। प्रयुतं। अनिः। अशनिः। धमनिः। अवनिः। अणि। अरणिः। तरणिः। विषाणिः। मकरवरूढपारेव
तवितस्त्रे क्ष्वार्जिद्राक्षाकलोमाकाष्ठापेष्ठाकाशीनामादिर्वा। मकरादीनां आदिरुदात्तो वा स्यात् पक्षे द्वितीयमुदात्तं। द्वितीय
मित्यधिकारात्। मकरः। वरूढः। वितस्तिः। पारेवतः। इक्षुः। आर्जिः। द्राक्षा। कला। उमा। काष्ठा। पेष्ठा। काशीनं। काशी। नानामि

© Dharmartha Trust J&K. Digitized by eGangotri

स्व·रा·शे· तिपठितवेत्युभावप्यार्षः। केचित्तु मकरवक्रुठपारेवतेतिकापापैत्रा इति पठंति। छंदसि च। छंदसिमकरादीनामन्येषां वा द्वि
१६ तीयो वोदात्तः स्यात्। काश्यपः। कर्दमादीनां वा कर्दमादीनामादिर्द्वितीयो वोदात्तः स्यात्। कर्दमः। कुलटा। उदकं। गांधारिः।=
16 सुगंधितेजनस्य च। सुगंधितेजनशब्दस्यादिर्द्वितीयो वोदात्तः स्यात्। सुगंधितेजनं। केचित्तु सुगंधितेजनस्य ते वा इति पठित्वा
तेशब्दोपि पक्षेऽदात्त इत्याहुः। ल्लेफो नयः। नपुंसकस्य लशब्दे परे फशब्द उदात्तः स्यात्। फलं। सफलं। ब्रुस्थफलं। दासीफलं।
केचित्तु फाशब्दस्योदात्त इति सूत्रं व्याख्याय सफालं इत्यादुदाजहुः। अन्येतु नयः फलांतानामिति फलिष्ठाः द्विर्द्वितीयं वोदात्तं
इति व्याख्याय राजादनफलमित्युदाजहुः। यांतस्यांत्यात्पूर्वो यशब्दांतस्यांत्यात्पूर्वमुदात्तं स्यात्। कुलायः। मलयः। उभयः। ग
वयः। केकयः। थांतस्य च नालघुनी। थाकारांतस्य नाशब्द लघुनी अंत्यात्पूर्वे उदात्ते स्तः। नाना। नासा। नाभा। लघु। द्विवा। गुक्षा
सुक्षा। थांतस्य क्विं। विविधं। नालघुनाक्षिं। द्वेक्ष। त्रेक्ष। शिंशुमारोदुंबरबलीवर्देष्ठारपुरूरवसां च। एषामंत्यात्पूर्वमुदात्तः
स्यादित्येके। एषामंत्यात्पूर्वं द्वितीयं वोदात्तमित्यपरे। शिंशुमारः। शिशुमार इति पाठांतरं। उदुंबरः। बलीवर्दः। उष्ट्रारः। उष्टार
इति पाठांतरं। पुरूरवाः। सांकाश्यकांपिल्यनासिक्यदार्वाघाटानां वा। एषामंत्यात्पूर्वमुदात्तो वा स्यात्। सांकाश्यः। कांपिल्यः। संका
शकंपिलाभ्यां बुञ्छणदिसूत्रेण ण्यः। प्रत्ययस्वरेण पक्षेंऽतोदात्तौ। नासिकायां भवो नासिक्यः। शरीरावयवाद्वेति य
तस्तित्स्वरितांतः। दारु आहंतीति दार्वाघाटः। दारावाहनोऽणंतस्य च टः संज्ञायामिति वार्त्तिकेन एरंतस्य टः। अत्र प
क्षे द्वितीयउदात्तः। कृदुत्तरपदप्रकृतिस्वरेणांतोदात्तः। सप्तमी सिद्धस्थक्षेति सूत्रे सांकाश्यकांपिल्यनासिक्यदार्वाघाटानां राम
मंतः पूर्वं वा इति काशिकाकारः पपाठ। अस्मिन्पक्षे नासिक्यशब्दपक्षेऽतोदात्तः। राजन्यसांकाश्यकांपिल्यनासिक्यदार्वाघाटा

२ पक्षे १६

© Dharmartha Trust J&K. Digitized by eGangotri

नामादिर्वान्तो वा इति पद्धन्नो मासिति सूत्रे कैयटः पपाठ। तस्मादत्र तत्त्वमाचार्य एव वेद। ईषां तस्य हयादेराद्विवी। ईषां तस्य
हलादेः सद्विरुदात्तो वा स्यात्। हलीषा। कुरीषं। शिरीषं। पुरीषं। पद्धेल घां वंते इति मध्योदात्ताः। ईषां तस्य किं। मंजूषा। हयादेः किं।
रुजीषं। अंबरीषं। उशीर दाशेरक पालाल शैवाल श्यामाक शरीर शराव हृदय हिरण्यारण्यापत्य देवराणां। एषामादि
रुदात्तः स्यात्। उशीरः। दाशेरकः। पलालं। शैवालं। श्यामाकः। शरीरं। शरावः। हृदयं। हिरण्यं। अरण्यं। अपत्यं। देवरः। अ
त्र श्यामाकग्रहणं चिंत्यं। धान्यानां च वृद्धान्तानामित्येव सिद्धत्वात्। मध्योदात्तस्यापि वेदे प्रयोगात्। हृदयग्रहणं स्वांगानाम
कुर्वादीनामिति द्वितीयस्योदात्तत्वं बाधितुं। अन्येषां लघावन्ते इति प्राप्ते वचनं। महिष्याषाढयोर्जायेष्टकाख्याचेत्। आख्या
७८ यामिति पाठांतरं। एतयोरादिरुदात्तः स्यात् क्रमाज्जायाख्यायामिष्टकाख्यायां च। महिषी जाया। आषाढामुपदधाति। महि
ष्याषाढयोः किं। सिंही असि। जायेष्टकाख्यायां किं। महिषी। आषाढा नक्षत्रं। नक्षत्राणामाब्विषयाणामित्यंतोदात्तं॥ इति फिट्
सूत्रेषु तृतीयः पादः॥ शकटिशकट्योरक्षरमक्षरं पर्यायेण। एतयोरक्षरः पर्यायेणोदात्ताः स्युः। शकटिः ३। शकटी ३। गोष्ठ
जस्य ब्राह्मणनामधेयस्य। ब्राह्मणार्थस्य गोष्ठजशब्दस्याक्षरं पर्यायेणोदात्ताः स्युः। गोष्ठजः ३। ब्राह्मणः। अन्यत्र गोष्ठजः पशुः। कृ
दुत्तरपदप्रकृतिस्वरेणांतोदात्तः। पारावतस्योपोत्तमवर्जं। पारावतस्योपोत्तमं वर्जयित्वा चत्वार उदात्ताः स्युः। पारावतः। वशाब्दो
नोदात्तः। धूम्रजानु मुंजकेश कालवाल स्थालीपाकानामधूजलस्थानां। एषां चतुर्णामक्षरं पर्यायेणोदात्ताः स्युः धूजल

© Dharmartha Trust J&K. Digitized by eGangotri

 स्थानां ना। धूम्रजानुः। मुंजकेशः। कालबालः। स्थालीपाकः। एषु धूजलस्था एते नोदात्ताः। कपिकेशहरिकेशयोश्छंदसि। एतयोर
१८ वः पर्यायेणोदात्ताः स्युश्छंदसि। कपेरिव हरेरिव केशा यस्य स कपिकेशः हरिकेशः। ४। भाषायां बहुव्रीहौ प्रकृत्या पूर्वपदं।
यद्या निरुदकादेराकृतिगणत्वादंतोदात्तत्वं। न्यङ्स्वरौ स्वरितौ। एतौ स्वरितौ स्यातां। न्यङ्ङुत्तानां। वा बह्वयं त्वः। न्यर्बु
17 दव्यल्कशयोरादिः। एतयोरादिः स्वरितः स्यात्। न्यर्बुदः। पाकदूर्वा व्यल्कशा। तिल्यशिक्यमर्त्यकार्ष्मर्यधान्यकन्याराज
न्यमनुष्याणामंतः। एषामंतः स्वरितः स्यात्। तिलानां भवनं तिल्यं। यतोनाव इति प्राप्ते। शिक्यं। मर्त्यं। कार्ष्मर्यं। धान्यं।
कन्या। राजन्यः। मनुष्यः। केचित्तु मर्त्यशब्दं न पठंति। युक्तं चैतत्। तं त्वा हवंत मर्त्याः। इत्याद्यावाद्युदात्तत्वदर्शनात्। तद्धु
ताककर्मणो णिति सूत्रे स्थूवान्निकेनूछंदेस्यं तस्वरितानिर्यतो नावद्यत्याद्युदात्तत्वं। केचित्तु धान्यस्य स्थाने धन्यशब्दं यत्र
पठंति। तदयुक्तं। पत्या वैश्वर्ये इति सूत्रे धान्यमंतस्वरितं इति काशिकास्थं प्रतीकमुपादाय स्यैव सूत्रस्य हरदत्तेनोपन्या
सात्। प्रयुज्यते च धान्यमसि धिनुहि। विल्वभक्ष्यवीर्याणि छंदसि। एतानि ४ स्युः। विल्वः। भक्ष्यं। वीर्यं। केचित्तु विल्ववस्ते
ति पठंति। भाषायां तु वीरेषु साधुरिति यत्। भक्ष्यते र्णिजंताद्वोयत्। यतोनाव इत्याद्युदात्तौ। विल्वः स्वरितांतोंतोदात्तो वा।
अन्यःफिट्त्वादंतोदात्तः। त्वत्वसमसिमेत्यनुच्चानि। एतानि सर्वानुदात्तानि स्युः। स्वरीरुत्वन्नवाति स्तत उत्वत्राउत त्वःप राम
श्यन्। न भेत्तामन्यके समे। सिमस्मै। केचिदत्र सूत्रेऽदसे नो पठंति त्वत शब्दं च न पठंति छंदसीति वानुवर्त्तयंति। तन्न।

© Dharmartha Trust J&K. Digitized by eGangotri

असौयः पंथा आदित्यः। अमीयेपंचोक्षणः। अदोयद्दारुप्लवते इत्यादावंतोदात्तत्वदर्शनात्। आद्युदात्तश्चेतिसूत्रेऽत्रछंदसीतिनिवृत्तमिति
माधवस्वरसात्। सिमस्याथर्वणेंतउदात्तः। सिमशब्दस्याथर्ववेदेंऽतउदात्तः स्यात्। अथर्वणे इतिप्रायिकं। तेनाऽश्चात्रीवासस्तनुतेसिम
स्मैइत्यृग्वेदेपिभवत्येव। निपाता आद्युदात्ताः। निपातसंज्ञका आद्युदात्ताः स्युः। स्वाहा। सहशब्दोनिपतत्वादाद्युदात्त इतिसहस्य सः स
स्मैइत्यत्र... उपसर्गाश्चाभिवर्जं। अभिशब्दंवर्जयित्वाउप
ह्याया मितिसूत्रे माध्यादिग्रंथाः तेपुत्रस्सूरिभिःसहेत्यत्रछांदसमंतोदात्तत्वंबोध्यं। उपसर्गाश्चाभिवर्जं। अभिशब्दं वर्जयित्वाउप
सर्गा आद्युदात्ताः स्युः। प्र। परा। अप। सं। अनु। अव इत्यादि। अभिवर्जं किं। अभ्यभिहिश्रवसाततर्दिथ। अभिरामस्तुत। निपात
त्वादेवसिद्धे उपसर्गग्रहणं तापयतिकर्मप्रवचनीयस्य निपातस्याद्युदात्तत्वंनेकेचिदाहुः। अन्येतु कर्मप्रवचनीयस्याद्युदात्तत्वे
त्वस्येष्टत्वादिहोपसर्गग्रहणंव्यर्थमित्याहुः। अपरेपुनः उपसर्गप्रयुक्तंयदमेराद्युदात्तत्वंतदेवनिषिध्यते ननुनिपातप्रयुक्तमेत
दर्थमुपसर्गग्रहणमित्याहुः। एवमादीनामंतः। एवमादीनामंतउदात्तः स्यात्। एवं। एव इत्यादि। वाद्ययोनुदात्तौ इत्यस्यापवादः। अत्र ता
त्र अहशब्दश्च शब्दाद्वावनुदात्तौ निपातौ। आदहस्वधामनु। काह मित्रावरुणा। शम्यदिंद्रः पौ मुषद्भिः। वावादीनामनुभौ। वावइत्येवमा
दीनामंतोदात्तौस्यातां। वावाउभौग्रहणमनुदात्तंपदमेकवर्जमित्यस्यबाधनाय। प्रयोगानुसारिणोवावादयः। वादयोनुदात्ताः
निपातास्चादयोनुदात्ताः स्युः। अहंचत्वंचवृत्रहन्। वावरेयावत्। त्वंह्ययघाविष्य। निपाताःकिं। परुनैति। आद्युदात्तत्वापवादः।
यंयोगः। यथेतिपादांते। यथाशब्दः पादांतेनुदात्तः स्यात्। तंनेमिमृभवोयथा। पुराजीवष्टनोयथा। पादांतेकिं। यथानोअदितिः
करत्।

© Dharmartha Trust J&K. Digitized by eGangotri

स्व॰ रा॰ शे॰ सर्वे विधयश्छंदसि विकल्प्यंते। तेन इंद्रं नाम श्रुत्यं शाकिनं वचो यथा इत्यादौ पादांतेपि नानुदात्तः। प्रकारादिद्विरुक्तौ परस्यांतउदात्तः। प्र
१८ कारे गुणवचनस्येत्यादि द्वित्वे परस्यांतउदात्तः स्यात्। पटुपटुः। तत्रापि कर्मधारयवद्भावादंतोदात्तत्वमुक्तं। शेषं सर्वमनुदात्तं। प्रकारादि
द्वित्वादन्यस्मिं द्वित्वे परं सर्वमनुदात्तं स्यात्। देवं देवं वो वसे॥ इति फिट्सूत्रेषु चतुर्थः पादः॥ ॥प्रसंगात्स्वरादिस्वरः। स्वर। स्वरितोयं॥
न्यज्स्वरौ स्वरितौ इति स्वरज्ञात्। अंतर। प्रातर। अंतोदात्तावेतौ। पुनर। आद्युदात्तोयं। सनुतर। उच्चैस्। नीचैस्। अंतोदात्ता एते। शश्वत्। आ
द्युदात्तोंतोदात्तश्च। ऋधगित्यासमर्थः। ऋधक्सोमस्वस्तये। शनैस्। आद्युदात्तोयं। ऋते। युगपत्। आरात्। पृथक्। ह्यस्। श्वस्। अंतो
दात्ता एवते। दिवा। आद्युदात्तोयं। रात्रौ। सायं। चिरं। मनाक्। ईषत्। जोषं। तूष्णीं। बहिस्। अवस्। समया। निकषा। स्वयं। एतेंतोदात्ताः॥
वृथा। नक्तं। आद्युदात्तावेतौ। नञ्। हेतौ। इद्धा। अद्धा। सामि। एतेंतोदात्ताः॥ सना। सनत्। आद्युदात्तावेतौ। सनात्। तिरस्। अंतोदात्तो।
अंतरा। अंतरेणत्यादयोंतोदात्ताः॥ ॥इति स्वरादिस्वरः॥ ञ्नित्यादिर्नित्यं। व्याख्यातं इदं पूर्वं। गार्ग्यः। वात्स्यः। बैदः। और्वः। वासुदे
वार्जुनाभ्यां वुन्। वासुदेवकः। अर्जुनकः। श्रोत्रियंश्छंदोधीते इत्यत्र छंदसः श्रोत्रभावो धाते इत्यर्थे घन्। अस्मिन्पक्षे श्रोत्रिय आद्युदात्तः
सिद्धः। यद्वा पिवाकार्थे पदवचनमिति पक्षे स्तदापि नित्त्वसामर्थ्यादाद्युदात्तः। अनुबंधनिमित्ते स्वरे कर्तव्ये लुमता लुप्ते प्रत्ययलक्षणं नास्ति
इति संज्ञायामुपमानमित्यत्र ज्ञापयिष्यमाणत्वादिह न भवति। गर्गाः। वत्साः। विदाः। उर्वाः। यञः अञश्च लुक्। प्रातिपदिकत्वादंतोदात्ताः।
उष्ट्रग्रीवा। इवे प्रतिकृतौ कन्। लुम्मनुष्ये। समासस्यादंतोदात्तः। मंत्रे वृषेषपचमनविदभूवीरा उदात्तः। एभ्यः क्तिन् उदात्तः स्यात्॥ राम
मंत्रे। वृष्टिः। इष्टिः। पक्तिः। मतिः। वित्तिः। भूतिः। वीतिः। रातिः। भाषायामेते आद्युदात्ताः। ऊतियूतिजूतिसातिहेतिकीर्तयश्च। एते क्तिन्नं

© Dharmartha Trust J&K. Digitized by eGangotri

स्वर वैदिकी कौमुदी